# पंचमं सोपानम्

## अंतरिक्षोत्पातलक्षणं

वनस्पतीनां वृक्षाणां फलकुसुमसम्प्रवृद्धिं फलानां कुसुमानां च पुष्पाणां सम्यक् प्रवृद्धिं विलोक्य दृष्ट्वा द्रव्याणां सर्वेषां सुलभत्वं सामर्थ्यं विज्ञेयं विज्ञातव्यम्। तथा सस्यानामपि निष्पत्तिः सम्पद् ज्ञेयेति।।१।।

शालो वृक्षविशेषस्तस्य फलकुसुमसम्प्रवृद्धिं दृष्ट्वा कलमशाल्यादीनां निष्पत्तिः सुलभत्वं च ज्ञेयम्। एवं सर्वत्र। तस्माच्छालेन कलमशाली विज्ञातव्या। तथा रक्ताशोकेन रक्तशालिः। पाण्डूकः शालिविशेषः स च क्षीरिकया दुग्धिकया ज्ञेयः। सूकरकः शालिविशेषः, स च नीलाशोकेन विज्ञेयः।

यवकः शालिविशेषः, स च न्यग्रोधेन विज्ञेयः। षष्टिकः शालिविशेषः, स च तिन्दुकवृद्धया भवति। अश्वत्थेन सर्वसस्यानां निष्पतिर्ज्ञेया ज्ञातव्या।

जम्बुवृक्षविशेषस्ताभिर्जम्बुभिस्तिलमाषा ज्ञातव्याः। शिरीषो वृक्षविशेषस्तद्वृद्धया कङ्गनिष्पतिः। कङ्गुः प्रियङ्गुः। मधूको वृक्षविशेषः। तैर्मधूकैर्गोधूमा ज्ञेयाः। सप्तपर्णो वृक्षिविशेषस्तेन यववृद्धि-र्भवति।

अतिमुक्तको वृक्षविशेषः कुन्दश्च यत्र कुन्दपुष्पाणि भवन्ति। ताभ्यामतिमुक्तककुन्दाभयां कर्पासं वदेत् ब्रूयात्। अशनो वृक्षविशेषस्तैः सर्षपान् वदेद् ब्रूयात्। बदरीभिश्च कुलत्यान् वदेत्। चिरबिल्वेन करञ्जेन मुद्गनादिशेद् ब्रूयात्।

## १. कुसुमलताध्यायः

तत्रादोवेव तत्प्रयोजनप्रदर्शनार्थमाह-

**फलकुसुमसम्प्रवृद्धिं वनस्पतीनां विलोक्य विज्ञेयम्।**
**सुलभत्वं द्रव्याणां निष्पत्तिश्चापि सस्यानाम्।।१।।**

वनस्पतीनां वृक्षाणां फलकुसुमसम्प्रवृद्धिं फलानां कुसुमानां च पुष्पाणां सम्यक् प्रवृद्धिं विलोक्य दृष्ट्वा द्रव्याणां सर्वेषां सुलभत्वं सामर्थ्यं विज्ञेयं विज्ञातव्यम्। तथा सस्यानामपि निष्पत्तिः सम्पद् ज्ञेयेति।।

अथ केन कस्य वृद्धिर्ज्ञेयेत्येतदाह-

**शालेन कलमशाली रक्ताशोकेन रक्तशालिश्च।**
**पाण्डुकः क्षीरिकया नीलाशोकेन सूकरकः।।२।।**

शालो वृक्षविशेषस्तस्य फलकुसुमसम्प्रवृद्धिं दृष्ट्वा कलमशाल्यादीनां निष्पत्तिः सुलभत्वं च ज्ञेयम्। एवं सर्वत्र। तस्माच्छालेन कलमशाली विज्ञातव्या। तथा रक्ताशोकेन रक्तशालिः। पाण्डुकः शालिविशेषः स च क्षीरिकया दुग्धिकया ज्ञेयः। सूकरकः शालिविशेषः, स च नीलाशोकेन विज्ञेयः।

अथान्यत्

**न्यग्रोधेन तु यवकस्तिन्दुकवृद्धया च षष्टिको भवति।**

**अश्वत्थेन ज्ञेया निष्पत्तिः, सर्वसस्यानाम्।।३।।**

यवकः शालिविशेषः, स च न्यग्रोधेन विज्ञेयः। षष्टिकः शालिविशेषः, स च तिन्दुक-वृद्धया भवति। अश्वत्येन सर्वसस्यानां निष्पतिर्ज्ञेया ज्ञातव्या।।

अथान्यत्।

**जम्बूभिस्तिलमाषाः शिरीषवृद्धया च कङ्गुनिष्पत्तिः।**

**गोधूमाश्च मधूकेर्यववृद्धिः सप्तपर्णेन।।४।।**

जम्बुवृक्षविशेषस्ताभिर्जम्बुभिस्तिलमाषा ज्ञातव्याः। शिरीषो वृक्षविशेषस्तद्वृद्धया कङ्गनिष्पतिः। कङ्गुः प्रियङ्गुः। मधूको वृक्षविशेषः। तैर्मधूकैर्गोधूमा ज्ञेयाः। सप्तपर्णो वृक्षिविशेषस्तेन यववृद्धिर्भवति।।

अथान्यत्-

**अतिमुक्तककुन्दाभ्यां कर्पासं सर्षपान् वदेदशनैः।**

**बदरीभिश्च कुलत्थांश्चिरबिल्वेनादिशेन्मुद्गान्।।५।।**

अतिमुक्तको वृक्षविशेषः कुन्दश्च यत्र कुन्दपुष्पाणि भवन्ति। ताभ्यामतिमुक्तककुन्दाभयां कर्पासं वदेत् ब्रूयात्। अशनो वृक्षविशेषस्तैः सर्षपान् वदेद् ब्रूयात्। बदरीभिश्च कुलत्यान् वदेत्। चिरबिल्वेन करञ्जेन मुद्गनादिशेद् ब्रूयात्।।

अन्यदप्याह-

**अतसी वेतसपुष्पैः पलाशकुसुमैश्च कोद्रवा ज्ञेयाः।**

**तिलकेन शङ्खमौक्तिकरजनान्यथ चेङ्गुदेन शणाः।।६।।**

वेतसो वृक्षविशेषस्तत्पुष्पैरतसी ज्ञेया ज्ञातव्या। पलाशकुसुमैः पलाशवृक्षपुष्पैः कोद्रवा ज्ञेया ज्ञातव्याः। तिलको वृक्षविशेषस्तेन शङ्खमौक्तिकरजतानि शङ्खः प्रसिद्धः, मौक्तिकं मुक्ताफलानि, रजतं रूप्यम्, एतानि विज्ञेयानि। अथानन्तरमिङ्गुदेन वृक्षविशेषेण शणा विज्ञेयाः।।

अथान्यत्-

**करिणश्च हस्तिकर्णैरादेश्या वाजिनोऽश्वकर्णेन।**

**गावश्व पाटलाभिः कदलीभिरजाविकं भवति।।७।।**

हस्तिकर्णैः करिणो गजा आदेश्या वक्तव्याः। वाजिनोऽश्वास्ते चाश्वकर्णेन एतौ द्वावपि सुप्रसिद्धौ। पाटलां वृक्षजातिस्ताभिर्गावः। अजश्छागोऽविर्मेषः। अजाविकं कदलीभी रम्भाभिर्भवति।।

अथान्यदप्याह-

**चम्पककुसुमैः कनकं विद्रुमसम्पच्च बन्धुजीवेन।**

**कुरवकवृद्धा वज्रं वैदूर्यं नन्दिकावर्तैः।।८।।**

कनकं सुवर्णं चम्पकपुष्पैः। बन्धुजीवने विद्रुमस्य सम्पत् सुलभत्वम्। वज्रं मणिविशेष-स्तत्कुरववृद्धया। नन्दिकावर्तैर्वैदूर्यम्।।

अथान्यदप्याह-

**विन्द्याच्च सिन्धुवारेण मौक्तिकं कारुकाः कुसुम्भेन।**

**रक्तोत्पलेन राजा मन्त्री नीलोत्पलेनोक्तः।।९।।**

सिन्धुवारो वृक्षविशेषस्तेन मौक्तिक् विन्द्याज्जानीयात्। कारुकाः शिल्पिनः कुसुम्भेन महारजतेन। राजा नृपो रक्तोत्पलेनोक्तः। नीलोत्पलेन मन्त्री सचिवः।।

अन्यदप्याह-

**श्रेष्ठी सुवर्णपुष्पात् पद्मैर्विप्राः पुरोहिताः कुमुदैः।**

**सौगन्धिकेन बलपतिरर्केण हिरण्यपरिवृद्धिः।।१०।**

सुवर्णपुष्पात् श्रेष्ठी ज्ञेयः। पद्मैः कमलैर्विप्रा ब्राह्मणाः। कुमुदैः कैरवैः पुरोहिता नृपाचार्याः। बलपतिः सेनापतिः सौगन्धिकेन। हिरण्यस्य सुवर्णस्य परिवृद्धिरर्केण।।

अथान्यत्-

**आम्रैः क्षेमं भल्लातकैर्भयं पीलुभिस्तथारोग्यम्।**

**खदिरशमीभ्यां दुर्भिक्षमर्जुनैः शोभना वृष्टिः।।११।।**

आम्रैश्चूतैः क्षेमं विन्द्यात्। भल्लातकैर्भयं भीतिम्। पीलुभिस्तथा आरोम्यमरोगित्वम्। खदिरशमीभ्यां प्रवृद्धाभ्यां दुर्भिक्षं भवति। अर्जुनैः शोभना वृष्टिः सुवृष्टिर्भवतीत्यर्थः।

अन्यदप्याह–

**पिचुमन्दनागकुसुमैः सुभिक्षमथ मारुतः कपित्थेन।**

**निचुलेनावृष्टिभयं व्याधिभयं भवति कुटजेन।।१२।।**

पिचुमन्दो निम्बवृक्षः , नागो नागकेसर इति प्रसिद्धः, तयोः पुष्पैः सुभिक्षं ज्ञेयम्। अथ कपिथेन मारुतो वायुः। कपित्थो वृक्षाविशेषः। निचुलेन वृक्षविशेषेण अवृष्टिभयं भवति। निचुलो जलवेतसवृक्षः। कुटजेन व्याधिभयं भवति।।

अन्यदप्याह–

**दूर्वाकुशकुसुमाभ्यामिक्षुर्वह्निश्च कोविदारेण।**

**श्यामालताभिवृद्धया बन्धक्यो वृद्धिमायान्ति।।१३।।**

दूर्वा शाद्वलम्। कुशो दर्भः। तत्कुसुमाभ्यां तत्पुष्पाभ्यामिक्षुर्भवति। कोविदारेण च वह्नि-रग्निः। श्यामलाता लतैव प्रसिद्धा। तदभिवृद्धया बन्धक्यो वेश्या वृद्धिमायान्ति प्राप्नुवन्ति।

अथैताभिर्वृष्टिलक्षणमाह–

**यस्मिन् काले स्निग्धनिश्छिद्रपत्राः सन्दृश्यन्ते वृक्षगुल्मा लताश्च।**

**तस्मिन् वृष्टिः शोभना सम्प्रदिष्टा यक्षैश्छिद्रैरल्पमम्भः प्रदिष्टम्।।१४।।**

वृक्षास्तरवः, गुल्म एकमूलो विटपः, लताः प्रसिद्धः एते यस्मिन् काले स्निग्धा निर्मला निश्छिद्रपक्षः, छिद्ररहितैः, पत्रैः, सन्दृश्यन्ते तस्मिन् काले शोभना वृष्टिः प्रदिष्टा उक्ता। तैरेव रूक्षैरस्निग्धैश्छिद्रैश्चाल्पं परिमितमम्भः पानीयं प्रदिष्टमुक्तम्। तथा च पराशरः–

## २. सन्ध्यालक्षणाध्यायः

तत्रादावेव तल्लक्षणमाह-

**अर्द्धास्तमितानुदिता् सूर्यादस्पष्टभं नभो यावत्।**
**तावत् सन्ध्याकालश्चिह्नैरेतैः फलं चास्मिन्।।१।।**

सूर्याद् आदित्यादर्द्धास्तमितादारभ्य यावन्नभ आकाशमस्पष्टभम्। अस्पष्टान्यस्फुटानि भानि नक्षत्राणि यत्र तत्। तावदेका सायंसन्ध्या। तथा स्पष्टभान्नभस आरभ्य प्रभातकाले यस्मिन् समये भानां स्वल्पा कान्तिर्भवति ततः कालाद्यावत्सूर्य अर्धोदितस्तावद् द्वितीया प्रातः सन्ध्या। एवमर्धास्त-मितानुदितात् सूर्यादस्पष्टभं नभो यावत्तावत्सन्ध्याकालः। तथा च गर्गः-

**बृ.सं.,पृ-३९५**

अस्मिन् सन्ध्याकाले एतैर्वक्ष्यमाणैश्चिह्नैर्लक्षणैः शुभाशुभं फलं वाच्यं वक्तव्यम्।।

इत्याह-

**मृगशकुनिपवनपरिवेषपरिधिपरिघाभ्रवृक्षसुरचापैः।**
**गन्धर्वनगररविकरदण्डरजः स्नेहवर्णैश्च।।२।।**

**भैरवमुच्चैर्विरुवन् मृगोऽसकृद् ग्रामघातमाचष्टेः।**
**रविदीप्तो दक्षिणतो महास्वनः सैन्यघातकरः।।३।।**

मृग उच्चैः कृत्वा भैरवं विरुवन् भयावहं शब्दं कुर्वन्नसकृदनेकवारं ग्रामघातं ग्रामविनाशचाचष्टे कथयति, तथा सैन्यस्ये सेनाया दक्षिणतो दक्षिणस्यां दिशि स्थितस्तत्र च रविदीप्तः सूर्याभिमुखो महास्वतो महाशब्दः सैन्यस्य घातं सेनाविनाशं करोति।।

अन्यदप्याह-

**अपसव्ये संग्रामः सव्ये सेनासमागमः शान्ते।**
**मृगचक्रे पवने वा सन्ध्यायां मिश्रगे वृष्टिः।।४।।**

**दीप्तमृगाण्डजलविरुता प्राक् सन्ध्या देशनाशमाख्याति।**
**दक्षिणदिक्स्थैर्विरुता ग्रहणाय पुरस्य दीप्तास्यैः।।५।।**

प्राक् सन्ध्या पूर्वसन्ध्या दीप्तमृगाण्डजविरुता। दीप्तैर्दीप्तदिक्स्थै रूक्षैः स्वनैः सूर्याभिमुखै-मृर्गरारण्यैः। अण्डजैः, पक्षिभिश्च विरुता कृतशब्दा देशस्य नाशमाख्याति कथपति।

तथा तैरेव मृगाण्डजैर्दीप्तास्यैः सूर्यभिमुखैर्ग्रामस्य पुरस्य वा दक्षिणदिक्स्थैर्याम्याशा-समवस्थितैर्विरुता सन्ध्या पुरस्य ग्रहणाय भवति। तत्पुरमन्यैः शत्रुभिर्गुह्यत इति।

अथ सन्ध्याकाले वायोर्लक्षणमाह-

**गृहतरुतोरणमथने सपांशुलोष्टोत्करेऽनिले प्रबले।**
**भैरवरावे रूक्षे खगपातिनि चाशुभा सन्ध्या।।६।।**

**मन्दपवनावघट्टितचलितपलाशद्रुमा विपवना वा।**
**मधुरस्वरशान्तविहङ्गमृगरुता पूजिता सन्ध्या।।७।।**

एवंविधा सन्ध्या पूजिता शुभेत्यर्थः। कीदृशी। मन्दपवनावघट्टितचलितपलाशद्रुमा, मन्देनाल्पेन पवनेन वायुना पदवघट्टितं चालनं तेन चलिताः कम्पिताः पलाशाः, पर्णानि येषु द्रुमेषु तथाभूता द्रुमा वृक्षा यस्यां सन्ध्यायाम्। विपवनाः वा वातरहिता। तथा मधुरस्वरैः कलशब्दैः शान्तैरनर्काभिमुखैर्विहङ्गैः पक्षितिर्मृगैश्च या रुता कृतशब्दा सापि पूजिता।

अन्यदप्याह-

**सन्ध्याकाले स्निग्धा दण्डतडिन्मत्स्यरिधिपरिवेषाः।**
**सुरपतिचापैरावतरविकिरणाश्चाशु वृष्टिकराः।।८।।**

**विच्छिन्नविषयमविध्वस्तविकृतकुटिलापसव्यपरिवृत्ताः।**
**तनुह्रस्वविकलकलुषाश्च विग्रहावृष्टिदाः किरणाः।।९।।**

**उद्द्योतिनः प्रसन्ना ऋजवो दीर्घाः प्रदक्षिणावर्ताः।**
**किरणाः शिवाय जगतो वितमस्के नभसि भानुमतः।।१०।।**

एवंविधाः किरणा रश्मयो भानुमत आदित्यस्य सम्बन्धिनो वितमस्के तमोरहिते नभस्याकाशे दृष्टा जगतो विश्वस्य शिवाय श्रेयसे भवन्ति। कीदृशाः। उद्द्योतिनो दीप्तिमन्तः। प्रसन्ना निर्मलाः। ऋजवः स्पष्टाः। दीर्घा आयामिनः। प्रदक्षिणावर्ताः प्रदक्षिणेनावर्तो येषां ते तथाविधाः।।

पूर्वमुक्तं यद्यमोघकिरणः सहस्त्रगोरिति तत्र न ज्ञायते। तदर्थममोघकिरणानां लक्षणमाह-

**शुक्लाः करा दिनकृतो दिवादिमध्यान्तगामिनः स्निग्धाः।**
**अव्युच्छिन्ना ऋजवो वृष्टिकारस्ते त्वमोघाख्याः।।११।।**

**कल्माषबभ्रुमकपिला विचिन्नमाञ्जिष्ठहरितशबलाभाः।**

**त्रिदिवानुबन्धिनोऽवृष्टयेऽल्पभयदास्तु सप्ताहात्।।१२।।**

कल्माषाः पीतगौरकृष्णवर्णाः। बभ्रव ईषत्कपिलाः, कपिलवर्णाः। विचित्रा नानावर्णाः। माञ्जिष्ठा मञ्जिष्ठभाः। हरिताः शुक्रवर्णाः। शबलाभाः कृष्णश्वेतकान्तयः। केषाञ्जित्पाठः शबला वा। त्रिदिवानुबन्धिनास्त्रिदिवमाकाशं तत्रानुबन्धिनोऽनुबन्धशीलाः, सकलमाकाशं व्याप्य स्थिता इत्यर्थः। ऊर्ध्वगामिनश्च। एते दृष्टा अवृष्टये भवन्ति। तथा सप्ताहाद्दिनसप्तकात् परतोऽल्पमीषद् भयं ददति।।१२।।

अथैतेषामुक्तलक्षणानां फलान्याह-

**ताम्रा बलपतिमृत्युं पीतारुणसन्निभाश्च तद्व्यसनम्।**

**हरिताः पशुसस्यबधं धूमसवर्णा गवां नाशम्।।१३।।**

**माञ्जिष्ठाभाः शस्त्रग्निसम्भ्रमं बभ्रवः पवनवृष्टिम्।**

**भस्मसदृशास्त्ववृष्टिं तनुभावं शबलकल्माषाः।।१४।।**

**बन्धूकपुष्पाञ्चनचुर्णसन्निभं सान्ध्यं रजोडभ्येति यदा दिवाकरम्।**

**लोकस्तदा रोगशनैर्निपीड्यत शुक्लं रजो लोकविवृद्धिशान्तये।।१५।।**

बन्धूकपुष्यं प्रसिद्धमतिलोहितम्। अञ्जनचूर्णश्च प्रसिद्धोऽतिकृष्ण एव। तत्सन्निभं तत्सदृशं सन्ध्याकाले रजो तदा दिवाकरमभ्येति सम्मुखमुपगच्छति, तदा लोको जनपदो रोगशतैर्बहुभिर्गदैर्निपीड्यते उपताप्तयते। तथा शुक्लं श्वेतवर्ण सन्ध्यारजो लोकानां विवृद्धये संवर्धनाय। शान्तये शिवाय च भवति। तथा च पराशरः- **बृ.सं.,पृ-४००**

अधुना दण्डलक्षणमाह-

**रविकिरणजलदमरुतां सङ्घातो दण्डवत्स्थितो दण्डः।**

**स विदिक्स्थितो नृपाणामशुभो दिक्षु द्विजादीनाम्।।१६।।**

रविकिरणाः सूर्यरश्मयः, जलदो मेघः, मरुद्वायुः, एषां त्रयाणां सङ्घात एकीभावो यदा दण्डवत्स्थितो भवति तथा दण्डाकृतिसंस्थानाद्दण्ड इत्युच्यते। स च विदिक्स्थितो विदिक्षु स्थितो नृपाणां राज्ञामशुभोऽनिष्टदः। दिक्षूत्तराद्यासु चतसृषु स्थितः क्रमेण द्विजादीनां चतुर्णां वर्णानामशुभः। केचित् सामान्ये दिक्षु द्विजातीनामेवाशुभमिच्छान्ति।।

अथास्यैव विशेषमाह-

**शस्त्रभयातङ्ककरो दृष्टः प्राङ् मध्यसन्धिषु दिनस्य।**

**शुक्लाद्यो विप्रादीन यदभिमुखस्तां निहन्ति दिशम्।।१७।।**

**दधिसदृशाग्रो नीलो भानुच्छादी खमध्यगोऽभ्रतरुः।**

**पीतच्छुरिताश्च घना घनमूला भूरिवृष्टिकराः।।१८।।**

**अनुलोमगेऽभ्रवृक्षं शमं गति यायिनो नृपस्य वधः।**

**बालतरुप्रतिरूपिणि युवराजामात्ययोर्मृत्युः।।१९।।**

**कुवलयवैदूर्याम्बुजकिञ्जल्काभा प्रभञ्जनोन्मुक्ता।**

**सन्ध्या करोति वृष्टिं रविकिरणोद्भासिता सद्यः।।२०।।**

एवंविधा सन्ध्या सद्यस्तस्मिन्नेवाहनि वृष्टिं वर्षणं करोति। कीदृशी। कुवलयं नीलोत्पलम् वैदूर्यो मणिर्नीलपीतः, अम्बुजाकिञ्जल्कं पद्मकेसरम् , एषां सदृशी आभा कान्तिर्यस्याः। तथा प्रभञ्जनोन्मुक्ता प्रभञ्जनेन वातेनोन्मुक्ता रहिता। तथा रविकिरणोद्भासिता प्रकाशीकृता।।

अन्यल्लक्षणमाह-

**अशुभाकृतिघनगन्धर्वनगरनीहारधूमपांशुयुता।**

**प्रावृषि करोत्यवग्रहमन्यर्तौ शस्त्रकोपकरी।।२१।।**

अशुभा अनिष्टा आकृतिर्येषां घनानां मेघानाम्। गर्दभोष्ट्रकबन्धध्वांक्षमार्जाराकृतय इत्यर्थः। तथा गन्धर्वनगरं खपुरम्। नीहारधूमपांशवः प्रसिद्धाः। एतैर्युक्ता या सन्ध्या सा प्रावृषि प्रावृट्काले वर्षाकालेऽवग्रहमवृष्टिं करोति। वर्षावर्जिते चान्यऋतौ शस्त्रकोपं करोति।।

अथ षट्सु ऋतुषु लक्षणमाह-

**शिशिरादिषु वर्णाः शोणपीतसितचित्रपद्मरुधिरनिभाः।**

**प्रकृतिभवाः सन्ध्यायां स्वर्तौ शस्ता विकृतिरन्या।।२२।।**

**आयुधभृन्नररूपं छिन्नाभं परभयाय रविगामि।**

**सितखपुरेऽर्काक्रान्ते पुरलाभो भेदने नाशः।।२३।।**

छिन्नाभ्रं मेघखण्डमायुधभृन्नररूपं सायुधं पुरुषमिव तच्च रविगामि अर्कसमीपवर्ति यदि भवति, तदा परभयाय भवति। परेणां शत्रूणां सम्बन्धि भयमुत्पद्यते। सितखपुरे शुक्लवर्णे गन्धर्वनगरेऽर्काक्रान्ते, अर्कः, सूर्य आक्रान्तो येन, आच्छादित इत्यर्थः। तस्मिन् पुरलाभः , येन पुरं नगरमाक्रान्तं रुद्धं तस्य लाभो भवति। भेदने नाशः, अर्केण यदि मध्यात् खपुरं भिद्यते तदा पुरस्य नाशः, परैर्लुण्ठनं भवति।।

अन्यदप्याह-

**सितसितान्तघनावरणं रवेर्भवति वृष्टिकरं यदि सव्यतः।**

**यदि च वीरणगुल्मनिभैर्घनैर्दिवसभुर्तरदीप्तदिगुद्भवैः।।२४।।**

**नृपविपत्तिकरः परिधः सितः क्षतजतुल्यवपुर्बलकोपकृत्।**

**कनकरूपधरो बलवृद्धिदः सवितुरुद्गमकालसमुत्यिथतः।।२५।।**

सवितुरादित्यस्य परिघस्तिर्यक् स्थिता मेघरेखेत्यर्थः। उद्गमकाले उदयसमये समुत्थित उत्पन्नः सितः शुक्लो यदि दृश्यते तदा नृपस्य राज्ञो विपत्तिकरो मृत्युदः। क्षतजतुल्यवपू रक्तवर्णसदृशो बलस्य सेनायाः कोपकृद्भङ्गदः। बले स्वामिनो वा कृप्यन्ति। कनकरूपधरः सुर्णसदृशो बलस्य वृद्धिदो भवति।।

अथ परिधिवशेन शुभाशुभमाह-

**उभयपार्श्वगतौ परिधी रवेःप्रचुरतोयकरौ वपुषान्वितौ।**

**अथ स मस्तककुप्यरिचारिणः परिधयोऽस्ति कणोऽपि न वारिणः।।२६।।**

रवेरादित्यस्य परिधी प्रतिसूर्यावुभयपार्श्वगतौ पार्श्वद्वयस्थौ तौ च वपुषा शरीरेणान्विततौ सूर्यसंयुक्तौ। यतस्तयोः सूर्य एव शरीरम्। तथाभूतौ प्रचुरतोयकरौ बहुजलप्रदौ। अथ परिधयः समस्तककुप्परिचारिणः सकलदिग्व्यापिनो भवन्ति, तदा वारिणो जलस्य कणोऽपि नास्ति। न वर्षतीत्यर्थः।।

अथ सन्ध्याघनानां लक्षणमाह-

**ध्वजातपत्रपर्वतद्विपाश्वरूपधारिणः।**

**जयाय सन्ध्ययोर्घना रणाय रक्तसन्निभाः।।२७।।**

**पलालधूमसञ्चयस्थितोपमा बलाहकाः।**

**बलान्यरूक्षमूर्तयो विवर्धयन्ति भूभृताम्।।२८।।**

**विलम्बिनो द्रुमोपमाः खरारुणप्रकाशिनः।**

**घनाः शिवाय सन्ध्ययोः पुरोपमाः शुभावहाः।।२९।।**

**दीप्तविहङ्गशिवामृगघुष्टा दण्डरजः परिधादियुता च।**

**प्रत्यहमर्कविकारयुता वा देशनरेशसुभिक्षबधाय।।३०।।**

एवंविधा सन्ध्या देशस्य जनपदस्य नरेशस्य राज्ञः सुभिक्षस्य च बधाय नाशाय भवति। कीदृशी? दीप्तैः सूर्याभिमुखैर्विहङ्गैः पक्षिभिस्तथा शिवाभीर्दप्ताभिः। मृगैरारण्य-प्राणिभिर्घुष्टा कृतशब्दाः, तथा दण्डेन रजसा परिधेण च युता संयुक्ता। आदिग्रहणात् सुरचापगन्धर्वनगरनीहारा ज्ञेयाः। प्रत्यहं प्रतिदिनमर्क-विकारयुता वा। सविकारार्कसंयुक्ता। स्वरूपान्यत्वं विकारता। तथा च पराशरः- **बृ.सं.,पृ-४०५**

**प्राची तत्क्षणमेव नक्तमपरा सन्ध्या त्र्यहाद्वा फलं**

**सप्ताहात् परिवेषरेणुपरिधाः, कुर्वन्ति सद्यो न चेत्।**

**तद्वत् सूर्यकरेन्द्रकार्मुकतडित्प्रत्यर्कमेघानिला**

**स्तस्मिन्नेव दिनऽष्टमेऽथ विहगाः सप्ताहपाका मृगाः।।३१।।**

**एकं दीप्त्यां योजनं भाति सन्ध्या विद्युद्भासा षट् प्रकाशीकरोति।**

**पञ्चाब्दानां गर्जित यादि शब्दो नास्तीयत्तो केचिदुल्कानिपाते।।३२।।**

सन्ध्या दीप्त्या कान्त्या एकं योजनं भाति प्रकाशयति, सा च तावन्मात्र एव फलदा, योजनफलप्रदेत्यर्थः। तथा विद्युद्भासा तडिद्दीप्तया षड् योजनानि प्रकाशीकरोती। षण्यां योजनानां सा फलदेत्यर्थः। अब्दानां मेघानां गर्जितं शब्दः पञ्च योजनानि याति गच्छति। योजनपञ्चके फलद इत्यर्थः। नास्तीयत्तेति, केचिद्देवलादय एवमाहुः। यथोल्कानिपाते इयत्ता परिच्छित्तिर्नास्ति। सर्वत्र सा फलदेत्यर्थः। तथा च देवलः-

अथान्येषामप्याह-

**प्रत्यर्कसंज्ञः परिधिस्तु तस्य त्रियोजनाभः परिधस्य पञ्च।**

**षट्पञ्चदृशं परिवेषचक्रं दशामरेशस्य धनुर्विभाति।।३३।।**

प्रत्यर्कसंज्ञो यः प्रतिसूर्यस्तस्य परिधिस्त्रियोजनाभः त्रयाणां योजनानां तस्य कान्ति दृश्यते। योजनत्रये फलद इत्यर्थः। परिधस्य पञ्च, पञ्चसु योजनेषु परिधो दृश्यते। तावत्स्वेव फलद इत्यर्थः। परिवेषचक्रं परिवेषणमण्डलं षट्षञ्चदृश्यम षट्सु पञ्चसु वा योजनेषु दृश्यते। तावन्मात्र एव फलदम्। अमरेशस्येन्द्रस्य धनुरिन्द्रचापं च दशयोजनानि विभाति प्रकटीकरोति। दशानां योजनानां फलप्रदमित्यर्थः।।

## ३. दिग्दाहलक्षणाध्यायः

तत्रादावेव वर्णभेदनं तस्यैव फलमाह-

**दाहो दिशां राजभयाय पीतो देशस्य नाशाय हुताशवर्णः।**

**यश्चारुखः स्यादपसव्यवायुः सस्यस्य नाशं स करोति दृष्टः।।१।।**

दिशां दाहो दिग्दाहः। पीतः पीतवर्णो राजभयाय नृपभीतये भवति। तथा हुताशाणर्वो-ऽग्निसमप्रभो देशस्य जनपदस्य नाशाय क्षयाय भवति। यश्चारुणो लोहितवर्णः स्याद्भवेत् स चापसव्यवायुः अपसव्यो वामो वायुर्यस्य स दृष्टोऽवलोकितः सस्यस्य नाशं क्षयं करोतीति।।

**योऽतीव दीप्त्या कुरुते प्रकाशं छायामपि व्यञ्जयतेऽर्कवद्यः।**

**राज्ञो महद्वेदयते भयं स शस्त्रप्रकोपं क्षतजानुरूपः।।२।।**

यो दिग्दाहाऽतीव दीप्त्या अतिकान्त्या प्रकाशं कुरुते उद्योतं जनयति। तथा योऽर्कवदा- दित्यवच्छायामपि व्यञ्जयते प्रकाशयति। दृश्यमाना ये भावास्तदीयां छायामुत्पादयतीत्यर्थः। स च राज्ञो नृपस्य महद्भयं वेदयते आख्याति। क्षतजानुरूपो रक्तवर्णोऽतिलोहित इत्यर्थः। स शस्त्रकोपं करोति।।२।।

अथ सर्वासु दिक्षु फलमाह-

**प्राक् क्षत्रियाणां सनरेश्वराणां प्राग्दक्षिणे शिल्पिकुमारपीडा।**

**याम्ये रहोग्रैः पुरुषैस्तु वैश्या दूताः पुनर्भूप्रमदाश्च कोणे।।३।।**

**पश्चात्तुं शूद्राः कृषिजीविनश्च चौरास्तुरङ्गैः सह वायुदिक्स्थे।**

**पीडां व्रजन्त्युत्तरतश्च विप्राः पाखण्डिनो वाणिजकाश्च शार्व्याम्।।४।।**

**पश्चातु शूद्रा इति**। शूद्राः शूद्रजातयः कृषिजीविनः कार्षिकाः पश्चात् पश्चिमायां दिशि पीडां व्रजन्ति। वायुदिक्स्थे वायव्यां दिशि स्थिते दिग्दाहे चौरास्तुरङ्गैरश्वै सह पीडां व्रजन्ति। उत्तरत उत्तरस्यां दिशि विप्रा ब्राह्मणाः पीडां व्रजन्ति। पाखण्डिनो वेदबाह्या वाणिजकाश्च क्रयवि-क्रयजीविनः शार्व्यामैशान्यां दिशि पीडां व्रजन्ति। तथा च काश्यपः-

अथ शुभलक्षणमाह-

**नभः प्रसन्नं विमलानि भानि प्रदक्षिणं वाति सदागतिश्च।**

**दिशां च दाहः कनकावदातो हिताय लोकस्य सपार्थिवस्य।।५।**

## ४. भूकम्पलक्षणाध्यायः

तत्रादावेव तन्निमित्तार्थं मुनीनां मतभेद-प्रदर्शनार्थमाह-

**क्षितिकम्पमाहुरेके बृहदन्तर्जलनिवासिसत्त्वकृतम्।**

**भूभारखिन्नदिग्गजविश्रामसमुद्भवं चान्ये।।१ ।।**

एके मुनयो बृहदन्तर्जलनिवासिसत्त्वकृणं क्षितिकम्पमाहुः कथयन्ति। बृहन्तो ये य सत्त्वाः प्राणिनो झषमकरत्स्यकूर्मनक्रशिशुमारप्रभृतयोऽन्तर्जले जलमध्ये निवसन्ति, तत्कृतं क्षितिकम्पं भूचलनमाहुः। तेषां जलसंक्षोभणादुत्पद्यत इत्यर्थः। तथा च काश्यपः- **बृ.सं.,पृ-४१०**

भूभारखिन्नेति। तथा अन्य गर्गादय एवमाहुः। भूभारेण क्षितिभारोद्वहनेन खिन्नाः श्रान्ता ये दिग्गजा दिङ्नागास्तेषां विश्राम उच्छ्वसनं तदुद्भवं तदुत्पन्नं क्षितिकम्पमिति। तथा च गर्गः- **बृ.सं.,पृ-४१०**

अन्यन्मतान्तरमाह-

**अनिलोऽनिलेन निहतः क्षितौ पतन् सस्वनं करोत्यन्ये।**

**केचित्त्वदृष्टकारितमिदमन्ये प्राहुराचार्याः।।२ ।।**

अन्ये वसिष्ठादय एवमाहुः। अनिलो वायुः स च नभस्थोऽपरेणैवानिलेन निहतस्ताडितः क्षितौ भूमौ पतति, स च पतन् सस्वनं शब्दं भूकम्पं करोति उत्पादयति। तथा च वसिष्ठः- **बृ.सं.,पृ-४११**

केचित्त्वदृष्टकारितमिति। केचिद्वृद्धगर्गादय इदं भूकम्पदृष्टकारितं प्राहुः। अदृष्ट-शब्देन धर्माधर्मौ बुध्येते, ताभ्यां कारितं कृतमित्यर्थः। किल धर्मेण वृद्धेन प्रजानां शुभसं सूचनाय शुभं भूमिकम्पमुत्पद्यते। अधर्मेणाभिवृद्धेन प्रजानामशुभसंसूचनायाशुभं भूमिकम्प-मुत्पद्यत इति। तथा च वृद्धगर्गः- **बृ.सं.,पृ-४११**

अन्ये आचार्या पराशरादयो मुनय इदं वक्ष्यमाणं प्राहुरुक्तवन्तः।।

किं तदित्याह-

**गिरिभिः पुरा सपक्षैर्वसुधा प्रपतद्भिरुत्पतद्भिश्च।**

**आकम्पिता पितामहमाहामरसदसि सव्रीडम्।।३ ।।**

**भगवान्नाम ममैतत्त्वया कृतं यदचलेति तन्न तथा।**

**क्रियतेऽचलैश्चलद्भिः शक्ताहं नास्य खेदस्य।।४ ।।**

**तस्याः सगद्गदगिरं किञ्चित्स्फुरिताधरं विनतमीषत्।**

**साश्रुविलोवनमाननमालोक्य पितामहः प्राह।।५।।**

**मन्युं हरेन्द्र धात्र्याः क्षिप कुलिशं शैलपक्षभङ्गाय।**

**शक्रः कृतिमित्युकत्वा वा मा भैरिति वसुमतीमाह।।६।।**

**किन्त्वनिलदहनसुरपतिवरुणाः सदसत्फलावबोधार्थम्।**

**प्राग् द्वित्रिचतुर्भागेषु दिननिशोः कम्पयिष्यन्ति।।७।।**

पुरा पूर्वं गिरिभिः पर्वतैः सपक्षकै पक्षसहितैर्वसुधा भूः प्रपतद्भिरुत्पतद्भिश्च आकाशाद् भूर्भूम्याश्चा-काशमुत्पद्भिराकम्पिता चाल्यमाना सती अमरसदसि देवसभायां गत्वा सव्रीडं सलज्जं कृत्वा। केचित् सव्रीडेति पठन्ति। सव्रीडा सलज्जा पितामहं ब्रह्माणमाह उक्तवती।

किं तदित्याह। हे भगवन् पितामह ममैतत्वया भगवता नाम कृतं यदचलेति स्थिरा त्वमिति। तन्नाम न तथाचलैः पर्वतैश्चलद्भिर्भ्रमद्भिः क्रियते सम्पाद्यते, तस्मादस्य खेदस्य नाहं सोढुं शक्ता न समर्थेति।

किन्त्विति। अनिलदहनसुरपतिवरुणाः, अनिलो वायुः, दहनोऽग्निः, सुरपतिरिन्द्रः, वरुणोऽपाम्पतिः, एते चत्वारः सदसत्फलानां शुभाशुभफलानामवबोधार्थ संसूचयितुं दिननिशोः दिनं च निशा च तयोर्दिननिशोः समुदियोर्न प्रत्येकं प्राग्द्वित्रिचतुर्भागेषु त्वां कम्पयिष्यन्ति। दिवसस्य च पूर्वेऽर्द्धे अनिलः कम्पयिष्यति। द्वितीये दिनार्द्धेऽग्निः। तृतीये अहोरात्रभागे प्रथमनिशार्द्धे सुरपतिः। अहोरात्रस्य चतुर्थभागे निशायाश्चार्द्धे वरुणः कम्पयिष्यति। एवं प्रथममहोरात्रचतुर्भागो वायोर्वेला द्वितीयाग्नेस्तृतीया इन्द्रस्य चतुर्थी वरुणस्यद्वौ दिनस्य निशायाश्च द्वावेवं प्राग्द्वित्रिचतुर्भागेषु वेलामण्डलान्येतानि। तथा च पराशरः- **बृ.सं.,पृ-४१२**

तत्र चतुर्षु चतुर्भागेषु दिवानक्तमनिलानलेन्द्रवरुणजं कम्पक्रमं विन्द्यात्।

अथ वायव्यस्य कम्पस्य लक्षणं पूर्वलिङ्गानि चाह-

**धूमाकुलीकृताशे नभसि नभस्वान् रजः क्षिपन् भौमम्।**

**विरुजन् द्रुमांश्च विचरति रविरपटुकरावभासी च।।८, ९।।**

**रुपायुवभृद्वैद्याः स्त्रीकविगान्घर्वपण्यशिल्पिजनाः।**

**पीड्यन्ते सौराष्ट्रककुरुमगधदशार्णमत्साश्च।।१०, ११।।**

चत्वार्यार्यम्णाद्यानीति। आर्यम्णमुत्तरफल्गुनी तदाद्यानि चत्वारि नक्षत्राणि। उत्तरफल्गुनी हस्तश्चित्र स्वातिरिति। आदित्यं पुनर्वसुः। मृगशिरः सौम्यम्। अश्वयुगश्विनीत्येतानि सप्त

नक्षत्राणि वायव्यमण्डलम्। एतेषामन्यतमर्क्षे यदि भूकम्पो भवति तदा तद्वायव्यं ज्ञेयमिति। अस्य रूपाणि सप्ताहात्। अस्य च मण्डलस्य सप्ताहात्पूर्वं वक्ष्यमाणानि रूपाणि पूर्वलिङ्गानि भवन्ति।

तान्याह- धूमाकुलीकृताश इति। यदा वायव्यकम्पो भवति, तदा चैतानि प्राकिस्थतानि लिङ्गान्युत्पद्यन्ते। नभस्याकाशे धूमाकुलीकृताशे। धूमेन आकुली कृता आशा दिशो यत्र तथाभूते। नभस्वान् वायुर्भौमं भूमेरुत्थं रजो धूलिं क्षिपन् प्रेरयन् विचरति। तथा द्रुमान् वृक्षान् विरुजन् विभञ्जयन् विचरति। रविरादित्यः। अपटुकरावभासी च भवति। अपटुभिरचतुरैः करै रश्मिभिरवभासनं प्रकाशं करोति तच्छीलः। तथा च गर्गः- **बृ.सं.,पृ-४१४**

अथाग्नेयस्य मण्डललक्षणं पूर्वलिङ्गानि चाह-

**पुष्यान्तेयविशाखाभरणीविपत्र्याजभाग्यसञ्ज्ञानि।**

**वगा हौतभुजोऽयं करोति रूपाण्यथैतानि॥१२,१३॥**

**दीप्तौजसः प्रचण्डाः पीड्यन्ते चाश्मकाङ्गबह्लीकाः।**

**तङ्गणकलिङ्गवङ्गद्रविडाः शबरा अनेकविधाः॥१४, १५॥**

पुष्यः। आग्नेयं कृत्तिका। विशाखा। भरणी। पित्र्यं मघाः। अजशब्देनैकपादुच्यते। एवमज पूर्वभद्रपदा। भाग्यसंज्ञा पूर्वफल्गुनी। एतानि सप्त नक्षत्राणि। हौतभुजोऽयं वर्गः। हुतं भुङ्क्ते हुतभुक् तस्यायं हौतभुजः। आग्नेयं मण्डलम्। अथानन्तरम्। एतानि वक्ष्यमाणानि रूपाणि चिह्नानि सप्ताहात् पूर्वं करोति।

तारोल्कापातावृतमिति। अम्बरमाकाशं तारोल्कापातावृतम्। तारापातैरुल्कापातैश्चावृतं व्याप्तम्। सदिग्दाहं दिग्दाहसहितम्। आदीप्तमिवोज्ज्वलितमिव लक्ष्यते। सप्तदिवसान्तः सप्ताहमध्ये सप्तार्चिर-ग्निर्मरुत्सहायो वातसहितो विचरति वहन् दृश्यते। तथा च गर्गः- **बृ.सं.,पृ-४१५**

अथ फलान्याह- आग्नेये भूकम्पे अम्बुदानां मेघानां नाशः क्षयः। सलिलाशयानां जलधराणां वापीकूपतडागानां संक्षयः संशोषः। नृपतीनां राज्ञां परस्परं वैरं द्वेषः। दद्रू त्वग्विकारः। विचर्चिका रोगविशेषः पादजस्त्वग्विकारः। ज्वरः। विसर्पिका अङ्गविकारः। पाण्डुरोग उदरामयः। एते सम्भवन्ति।

दीप्तौजस इति। दीप्तमोजो येषां ते दीप्तौजसस्तेजस्विनः। प्रचण्डाः क्रोधिनः। एते पीडयन्ते पीडां प्राप्नुवन्ति। तथाश्मका जनाः। अङ्गाः। बाह्लीकाः। तङ्गणाः। कलिङ्गाः। वङ्गाः। द्रविणाः। शबरः। एते अनेकविधा बहुप्रकाराः। सर्व एव पीडयन्ते। अत्रापि पराशरः **बृ.सं.,पृ-४१६**

अग्नीन्द्राग्न्यजयमपितृगुरुभगदैवतेष्वनलोऽभिकम्पयन् वर्षसरित्सरः स्त्रोतसामपः क्षपयन् सुखानि रोगारोचकपिटकपाण्डुरुग्ज्वरकिटिभददूदाहकृद्विशेषाद्वातपादकाग्निवित्पुलिन्द-यवनबाह्लीकवङ्गोष्ट्रासन्त्यश्म-केक्ष्वाकुकुलुतसुखारशिविकत्रिगर्त वैदहद्रविडसुराष्ट्रमध्यदेश-दशार्णाश्च हिनस्ति इति।।

अथेन्द्रस्य मण्डलस्य लक्षणं पूर्वलिङ्गानि फलान्याह-

**अभिजिच्छ्रवणधनिष्ठाप्राजापत्यैन्द्रवैश्वमैत्राणि।**

**सुरपतिमण्डलमेतद्भवन्ति चाप्यस्य रूपाणि।।१६,१७।।**

**काशियुगन्धरपौरवकिरातकीराभिसारहलमद्राः।**

**अर्बुदसुराष्ट्रमाललवपीडाकरमिष्टवृष्टिकरम्।।१८, १९।।**

अभिभिच्छ्रवणं धनिष्ठा। प्राजापत्यं रोहिणी। ऐन्द्रं ज्येष्ठा। वैश्वमुत्तराषाढा। मैत्रमनुराधा। एतानि सप्त नक्षत्राणि सुरपतेरिन्द्रस्य मण्डलमेतत्। अस्यापि सप्ताहात् पूर्वं स्वरूपाणि भवन्ति।

पयोवाहाः मेघाः पयः पानीयं विसृजन्त्युत्सृजन्ति। कीदृशाः? चलिताचलवर्ष्माणः, चलितानामचलानां पर्वतानामिव वर्ष्म शरीरं येषां ते तथाविधाः। तथा गम्भीरविराविणः, गम्भीरो मधुरो विशेषेण रावः शब्दो येषाम्। तडिद्वन्तः, तडितो विद्युतस्ता विद्यन्ते येषु। गवलं महिषश्रृङ्गम्। अलिकुलं भ्रमरकुलम्। अहयः सर्पास्तन्निभास्तत्सदृशाः। गर्गः- **बृ.सं.,पृ-४१७**

ऐन्द्रवैश्वदेववैष्णवप्राजापत्यसौम्यादित्यमैत्रेषु सुरपतिरवनिमतिचालयन् प्रवृद्धाम्भो-दयज्ञधर्मान्नपानोत्सवो जात्यप्रथितकुलाधिपतिसुवास्तुनीचकाश्मीराभिसारप्राच्यशककिरातपौर-वाज्युतवास्वर्णवमालवपह्ल-वदण्डककाशिकार्षककैलासमल्ललहवहालानुपतापयति इति।।

अथ वारुणस्य लक्षणं पूर्वलिङ्गानि फलमाह-

**पौष्णाप्यार्द्राश्लेषामूलाहिर्बुध्न्यवरुणदेवानि।**

**मण्डलमेतद्वारुणमस्यापि भवन्ति रूपाणि।।२०।।**

**नीलोत्पलालिभिन्नाञ्जनत्विषो मधुरराविणो बहुलाः।**

**तडिदुद्भासितदेहा धाराङ्कुरवर्षिणो जलदाः।।२१।।**

**वारुणमर्णवसरिदाश्रितघ्नमतिवृष्टिदं विगतवैरम्।**

**गोनर्दचेदिकुकुरान् किरातवैदेहकान् हन्ति।।२२।।**

पौष्णं रेवती। आप्यं पूर्वाषाढा। आर्द्रा। आश्लेषां मूलम्। अहिर्बुध्न्यमुत्तरभद्रपदा। वरुणदेवं शतभिषक्। एतानि सप्त नक्षत्राणि। वारुणं मण्डलमस्यापि सप्ताहात् पूर्व रूपाणि चिह्नानि भवन्ति।

"वारुणाहिर्बुध्न्यपूषारुद्रभुजगनैर्ऋत्यदैवतेषु कम्पोऽबुपतिकृतः प्रततजलधरः। धरा-भिन्नकेदारपुरनगरप्रबद्धतरुणाततजलताक्षुपशष्पसस्यातीसारहिक्काक्षिरोगकृदपि च विशेषतः किरातकाश्मीरापरान्तककौकुरेयशौर्यारकचेदिवत्ससैन्धवोदकयात्रिकोदधिनदनदी-संश्रितांश्च देशानुपहन्ति इति।।"

अधुना फलकालनियमार्थमाह-

**षड्भिर्मासैः कम्पो द्वाम्यां पाकं च याति निर्धातः।**

**अन्यानपयुत्पातानं जगुरन्ये मण्डलैरेतैः।।२३।।**

षड्भिर्मासैः कम्पः पाकं याति फलं ददातीत्यर्थः। निर्घातो द्वाभ्यां मासाभ्यां पाकं याति। अन्ये मुनयो गर्गादयोऽन्यानप्युत्पातान् ग्रहणनिर्घातील्कापातादीनेतैरेव भूकम्पोक्तैर्मण्डलै-र्जगुरुक्तवन्तः। तथा च गर्गः- **बृ.सं.,पृ-४१९**

उल्काद्युत्पातानां फलनियमाः

**(उल्का हरिश्चन्द्रपुर रजश्च निर्घातभूकम्पककुप्प्रदाहाः।**

**वातोऽतिचण्डो ग्रहणं रवीन्द्वोर्नक्षत्रतारागणवैकृतानि।।**

**व्यभ्रे वृष्टिवैकृतं वातवृष्टिधूमोऽनग्निर्विस्फुलिङ्गर्चिषां वा।**

**वन्यं सत्त्वं ग्राममध्ये विशेद्वा रात्रावैन्द्रं कार्मुकं दृश्यते वा।।**

**सन्ध्याविकारः परिवेषखण्डा नद्यः प्रतीपा दिवि तूर्यनादः।**

**अन्यच्च यत्स्यात्प्रकृतेः प्रतीपं तन्मण्डलैरेव फलं निगाद्यम्।।**

अथ वेलामण्डलवशेन कम्पानां निष्फलत्वमाह-

**हन्त्यैन्द्रो वायव्यं वायुश्चाप्यैन्द्रमेवमन्योन्यम्।**

**वारुणहौतभुजावपि वेलानक्षत्रजाः कम्पाः।।२४।।**

ऐन्द्रः कम्पो वायव्यं हन्ति। ऐन्द्रमण्डलोत्पन्नो भूकम्पो वायुवेलाजं कम्पं नाशयति। एवं वायुश्चाप्यैन्द्रं हन्ति। एवमनेनैव प्रकारेण। अन्योऽन्यं परस्परं वारुणहौतभुजावपि। वारुणमण्डलमग्निजं हन्ति। अग्निवर्णरुणजं हन्ति। वेलाजाता नक्षत्रजाताश्च कम्पाः परस्परं नाशयन्तीत्यर्थः। तस्मानन्न फलदाः वेलामण्डलयोर्भेदा अभेदे त्वतिफलदाः। यथा वायव्ये मण्डले वायव्यां च वेलायां यः कम्पः स स्वफलमं पुष्टं ददात्येवमन्येऽपि बोद्धव्या इति।।

अथ वेलामण्डलवशेन कम्पोक्तस्य विशेषमाह-

**प्रथितनरेश्वरमरणव्यसनान्याग्नेयवायुमण्डलयोः।**

**क्षुद्‌भयमरकावृष्टिभिरुपताप्यन्ते जनाश्चापि।।२५।।**

आग्नेयवायुमण्डलयोराग्नेये मण्डले वायव्यां च वेलायाम्। अथवा वायव्यमण्डले आग्नेय्यां भूकम्पस्तस्मिन् प्रथितनरेश्वरमणव्यसनानि भवन्ति। प्रथिताः प्रख्याता ये नरेश्वरा राजानस्तेषां मरणं व्यसनानि भवन्ति। मृत्युदुःखं च भवतीत्यर्थः। तथा जना लोकाः क्षुद्भयमरकावृष्टिभिरुप-ताप्यन्ते, क्षुद्भयं दुर्भिक्षम्, मरको मरणम्, अवृष्टिरवर्षणम्, एतैररुपताप्यन्ते।।

पुनरप्याह-

**वारुणपौरन्दरयोः सुभिक्षशिववृष्टिहार्दयो लोके।**

**गावोऽतिभूरिपयसो निवृत्तवैराश्च भूपालाः।।२६।।**

वारुणो वरुणकृतः। पौरन्दर ऐन्द्रः। वारुणपौरन्दरयोर्वेलामण्डलयोः सुभिक्षम्। शिवं श्रेयः। वृष्टिर्वर्षणम्। हार्दिश्चित्ततुष्टिः। एते लोके भवन्ति। तथा गावः। अतिभुरिपयसो बहुक्षीराः। तथा भूपाला राजानो निवृत्तवैरा नष्टद्वेषा भवन्ति। तथा च काश्यपः- **बृ.सं.,पृ-४२१**

अधुना कम्प्व्यतिरिक्तानामन्येषामुत्पातानां येषां न कुत्रचित् कालनियमः कुतस्तेषां कालनिय-मार्थमाह-

**पर्क्षश्चतुभिरनिलस्त्रिभिरग्निर्देवराट् च सप्ताहात्।**

**सद्यः फलति च तरुणो येषु न कालोऽद्भुतेपूक्तः।।२७।।**

**चलयति पवनः शतद्वयं शतमनलो वशयोजनान्वितम्।**

**सलिलमतिरशीतिसंयुतं कुलिशधरोऽभ्यधिकं च षष्टितः।।२८।।**

पवनो वायुर्योजनानां शतद्वयं चलयति। एतदुक्तं भवति –वायव्ये मण्डले यो भूकम्पो भवति स योजनानां शतद्वयं कम्पयति। एवमनलोऽग्निर्दशयोजनान्वितं दशाधिकं योजनशतं चलयति। सलिलपतिर्वरुणोऽशीतिसंयुतं योजनशतं चलयति। कुलिशं वज्रं तद्धारयतीति कुलिशधर इन्द्रः षष्टितोऽधिकं योजनशतं चलयति। तथा च काश्यपः- **बृ.सं.,पृ-४२२**

अथ भूकम्पे वृत्ते पुनर्यदि भूकम्प आसन्नो भवति तस्य फलप्रदर्शनार्थमाह-

**त्रिचतुर्थसप्तमदिने मासे पक्षे तथा त्रिपक्षे च।**

**यदि भवति भूमिकम्पः प्रधाननृपनाशनो भवति।।२९।।**

भूकम्पे वृत्ते पुनर्यदि तृतीये दिवसे चतुर्थे वा सप्तमे दिने मासे त्रिंशद्दिने पक्षे पञ्चदशाहे। त्रिपक्षे दिनपञ्चचत्वारिंशता भूकम्पो भवति तदा प्रधाननृपाणां प्रतिष्ठितानां राज्ञां नाशनः क्षयावहो भवति। तथा च गर्गः- **बृ.सं.,पृ-४२२**

स्निग्धस्वनाः प्रदक्षिणानुयायिनोऽम्बुधरा धाराभिषिक्ताः पर्वसु च सर्व एव प्रशस्यन्ते। तीक्ष्णाम्बुवहोऽवनिपतिविग्रहोच्छ्र्याय। त्रिचतुः सप्तरात्रे पक्षमासत्रिपक्षान्तरे प्रततानुकम्पनः प्रवरनरपति-विनाशाय। अपि च शमयन्त्यासप्ताहात् कम्पादिकृतं निमित्तमाश्वेवाति-वर्षणोपवासव्रतदीक्षाजप्यहवनानि इति।।

## ५. उल्कालक्षणाध्यायः

तत्रादावेव स्वरूपप्रर्शनार्थमाह-

**दिवि भुक्तशुभफलानां पततां रूपाणि यानि तान्युल्काः।**

**धिष्ण्योल्काशनिविद्युत्तारा इति पञ्चधा भिन्नाः।।१।।**

दिवि स्वर्गे। भुक्तशुभफलनाम्, शुभानि फलानि भुक्तानि यैः स्वर्गस्थैस्तेषां पततां यानि रूपाणि दृश्यन्ते तान्युल्का इत्युच्यन्ते। गर्गादिभिः पुनरन्यथा कथितम्। यथा लोकपाला लोकानां शुभाशुभफल-सूचनायास्त्राणि ज्वलितान्युत्सृजन्ति तान्येवोल्काः। तथा च गर्गः- **बृ.सं.,पृ-४२४**

ताश्चोल्काः पञ्चधा। पञ्चभिः प्रकारैर्भिन्ना भेदिताः। तद्यथा-धिष्ण्या, उल्का, अशनिः, विद्युत् तारा ।। इति।।

अथ फलकालनियमार्थमाह-

**उल्का पक्षेण फलं तन्दद्विष्ण्याशनिस्त्रिभिः पक्षः।**

**विद्युदहोभिः षड्भिस्तद्वत्तारा विपाचयति।।२।।**

उल्का पक्षेण पञ्चदशभिर्दिनैः शुभाशुभफलमं विपाचयति सम्पादयतीत्यर्थः। तद्वद्धिष्ण्या तेनैव प्रकारेण पक्षेण फलं विपाचयति। अथाशनिस्त्रिभिः पक्षैर्दिनपञ्चचत्वारिशता। विद्यु-दहोभिःषड्भिर्दिनैः। तारा तद्वदेव षड्भिर्दिनैर्विपाचयति। समाससंहितायाम्- **बृ.सं.,पृ-४२४**

अथ फलनियामार्थमाह-

**तारा फलपादकरी फलार्द्धदात्री प्रकीर्तिता धिष्ण्या।**

**तिस्त्रः सम्पूर्णफला विद्युदथोल्काशनिश्चेति।।३।।**

**अशनिः स्वनेन महता नृगजाश्वमृगाश्मवेश्मतरुपशुषु।**

**निपतति विदारयन्ती धरातलं चक्रसंस्थाना।।४।।**

**विद्युत् सत्त्वत्रासं जनयन्ती तटसटस्वना सहसा।**

**कुटिलविशाला निपतति जीवेन्धनराशिषु ज्वलिता।।५।।**

**धिष्ण्या कुशाल्पपुच्छा धनूंषि दश द्दश्यतेऽन्तराभ्यधिकम्।**

**ज्वलिताङ्गारनिकाशा दौ हस्तौ सा प्रमाणेन।।६।।**

तारा हस्तं दीर्घा शुक्ला ताम्राब्जतन्तुरूपा वा।

तिर्यगधश्चोर्ध्व वा याति वियत्युह्यमानेव।।७।।

उल्का शिरसि विशाला निपतन्ती वर्धते प्रतनुपुच्छा।

दीर्घा च भवति पुरुषं भेदा बहवो भवन्त्यस्याः।।८।।

प्रेतप्रहरणखरकरभनक्रकपिदंष्ट्रिलाङ्गलमृगाभाः।

गोधाहिवूमरूपाः पापा या चोभयशिरस्का।।९।।

ध्वजभ्कषगिरिकरिकमलेन्दुतुरगसन्तप्तरजतहंसाभाः।

श्रीवृक्षवज्रशङ्खस्वस्तिकरूपाः शिवसुभिक्षाः।।१०।।

एवंविधाः सर्वाः शिवसुभिक्षाः, शिवं श्रेयः सुभिक्षं च कुर्वन्ति। कीदृश्यः? ध्वजः पताका-कृतिर्बहुपटविरचितः। झषो मीनः। गिरिः पर्वतः। करी हस्ती। कमलं पद्मम्। इन्दुश्चन्द्र। तुरगोऽश्वः। सन्तप्तरजतं गलितरौप्यम्। हंसः पक्षी। एतदाभाः एषां सदृश्यः। तथा श्रीवृक्षः प्रसिद्धः। वज्रं हरीकं वज्रमायुधं वा। शङ्खः प्रसिद्धः। स्वस्तिकः संस्थानविशेषः। एवंविदाश्चापि शिवसुभिक्षाः। तथा च काश्यपः- **बृ.सं.,पृ-४२७**

अन्यदपि लक्षणमाह-

अम्बरमध्याद् बह्वयो निपतन्त्यो राजराष्ट्रनाशाय।

बम्भ्रमती गगनोपरि विभ्रममाख्याति लोकस्य।।११।।

अम्बरमध्यान्नभोऽन्तः। बह्वयः प्रभूता अपि निपतन्त्यः सम्पतमाना राज्ञो नृपस्य राष्ट्रस्य जनपदस्य च नाशाय भवन्ति। तथा च गगनोपरि आकाशे योल्का बम्भ्रमती अत्यर्थ भ्रमति सा लोकस्य जनपदस्य विभ्रमं सम्भ्रममाकुलतामाख्याति कथयति।।

अन्यदप्याह-

संस्पृशती चन्द्रार्कौ तद्विसृता वा स भूप्रकम्पा च।

परचक्रागमनृपभयदुर्भिक्षावृष्टिभयजननी।।१२।।

योल्का चन्द्रार्कौ शशिसूर्यौ संस्पृशती। तौ संस्पृशति तद्विसृता वा ताभ्यां चन्द्रार्काभ्यां विसृता निर्गता। सभूप्रकम्पा च भूकम्पसहिता। तस्याः पतमानाया भूकम्पमुत्पद्यते। सा तथा भूता परचक्रागमं परचक्रस्यागमनम्। नृपभयं राजभयम्। दुर्भिक्षभयम्। अवृष्टिभयं च जनयत्यु-त्पादयति।।

अन्यदप्याह-

**पौरेतरघ्नमुल्कापसव्यकरणं दिवाकरहिमांश्वो :।**

**उल्का शुभदा पुरतो दिवाकरविनिः सृता यातुः।।१३।।**

दिवाकरहिमांश्वोरर्कचन्द्रयोः। उल्कापसव्यकरणम्। तयोरेवापसव्येन प्रदक्षिणेन गमनं करोति। तत्पौरेतरघ्नम्, दिवाकरस्यापसव्यकरणं पौरघ्नं पौरान्नागरान् हन्ति। हिमांशोरुल्कापसव्यकरणमितरघ्नम्, इतरे यायिनस्तान् हन्ति। या च दिवाकरविनिः सृता दिवाकरात् सूर्यान्निर्गता सा यातुर्जिगमिषोः पुरतोऽग्रतः पतिता शुभदा शुभं ददाति।।

अन्यदप्याह-

**शुक्ला रक्ता पीता कृष्णा चोल्का द्विजादिवर्णघ्नी।**

**क्रमशश्चैतान् हन्युर्मूर्धोरः पार्श्वपुच्छस्थाः।।१४।।**

**उत्तरदिगादिपतिना विप्रादीनामनिष्टदा रूक्षा।**

**ऋज्वी स्निग्धाखण्डा नीचोपगता च तद्वृद्धयै।।१५।।**

**श्वावारुणनीलासृग्दहनासितभस्मसन्निभा रूक्षा।**

**सन्ध्यादिनजा वक्रा दलिता च परागमभयाय।।१६।।**

श्यावा श्याववर्णा। अरुणा रक्ता। नीला नीलवर्णा। असृग्रुधिरं तद्वर्णा। दहनसन्निभा अग्निवर्णा। असितसन्निभा कृष्णा। भस्मसन्निभा भस्मवर्णा। रूक्षा अनिर्मला। सन्ध्यादिनजा सन्ध्याया दिने च जाता। वक्रा कुटिला। दलिता खण्डिता। एवंविधा परागमभयाय भवति। पराणां शत्रूणामागमाद्यद् भयं तत् करोति।।

अन्यदप्याह-

**नक्षत्रग्रहधातैस्तद्भक्तीनां क्षयाय निर्दिष्टा।**

**उदये घ्नती रवीन्दू पौरेतरमृत्यवेऽस्ते वा।।१७।।**

नक्षत्रोपघातैर्ग्रहोपघातैश्च तद्भक्तीनां नक्षत्राणां नक्षत्रव्यूहे ग्रहाणां च या भक्तय उक्तास्तासां क्षयाय विनाशाय निर्दिष्टा कथिता उक्ता। तथा च काश्यपः- **बृ.सं.,पृ-४३०**

रवीन्दू सूर्याचन्द्रमसौ उदये उदयसमये अस्ते अस्तसमये वा घ्नती पौरेतराणां मृत्यवे भवति। पौरा नागराः। इतरे यायिनः आदित्ये हते पौराणां चन्द्रे च यायिनामिति।।

अथ नक्षत्रोपतापेन फलमाह-

**भाग्यादित्यधनिष्ठामूलेषूल्काहतेषु युवतीनाम्।**
**विप्रक्षत्रियपीडा पुष्यानिलविष्णुदेवेषु।।१८।।**
**ध्रुवसौम्येषु नृपाणामुग्रेषु सदारुणेषु चौराणाम्।**
**क्षिप्रेषु कलाविदुषां पीडा साधारणे च हते।।१९।।**

**कुर्वन्त्येताः पतिता देवप्रतिमासु राजराष्ट्रभयम्।**
**शक्रोपरि नृपतीनां गृहेषु तत्स्वामिनां पीडाम्।।२०।।**
**श्राशायग्रहोपधाते तद्देश्यानां खले कृषिरतानाम्।**
**चैत्यतरौ सम्पतिता सत्कृतपीडां करोत्युल्का।।२१।।**
**द्वारि पुरस्य पुरक्षयमथेन्द्रकीले जनक्षयोऽभिहितः।**
**ब्रह्मायतने विप्रान् विनिहन्याद गोमिनो गोष्ठे।।२२।**

कुर्वन्त्येता इति। एता उल्का देवप्रतिमासु सुरार्चासु पतिता राजभयं नृपभयं राष्ट्रभयं जनपदभयं च कुर्वन्ति। शक्र इन्द्रस्तस्योपरि पतिता नृपतीनां राज्ञां भयं कुर्वन्ति। गृहेषु वेश्मसु पतितास्तत्स्वामिनां गृहपतीनां पीडां कुर्वन्ति।

अथान्यद्विशेषमाह-

**क्ष्वेडास्फोटितवादितगीतोत्कष्टस्वना भवन्ति यदा।**
**उल्कानिपातसमये भयाय राष्ट्रस्य सनृपस्य।।२३।।**

क्ष्वेडा क्ष्वेडितम्। आस्फोटितं करास्फोटः। वक्षस्थस्य बाहोर्द्वितीयेन हस्तेन ताडनं करास्फोटः। वादितं वाद्यशब्दः। गीतं प्रसिद्वम्। एषामुत्क्रुष्टा उद्घोषिताः स्वनाः शब्दा यदा भवन्ति कदा ? उल्कानिपातसमये, उल्कानिपातकाले , तदा राष्ट्रस्य सनृपस्य नृपतिसहितस्य भयाय भवन्ति।।

अन्यदप्याह-

**यस्याश्चिरं तिष्ठति खेऽनुषङ्गो दण्डाकृतिः सा नृपतेर्भयाय।**
**या चोह्यते तन्तुधृतेव खस्था या वा महेन्द्रध्वजतुल्सरूपा।।२४।।**

यस्या उल्कायाः खे नभसि। चिरं चिरकालम्। अनुषङ्ग आसक्तिस्तिष्ठति। तथा दण्डाकृति-र्दण्डाकारा च या दृश्यते सा नृपते राज्ञो भयाय भवति। या चोल्का खस्था

आकाशस्थिता तन्तुधृतेव, तन्तुना ध्रियमाणेनेवोह्यते धार्यते सापि नृपतेर्भयाय भवति। या च महेन्द्रध्वजस्येन्द्र-चिह्नस्य तुल्यरूपा तदाकारा सापि नृपतेर्भयाय भवति।।

अन्यदप्याह-

**श्रेष्ठिनः प्रतीपगा तिर्यग्गा नृपाङ्गनाम्।**

**हन्त्यधोमुखी नृपान् ब्राह्मणानथोर्ध्वगी।।२५।।**

**बर्हिपुच्छरूपिणी लोकसङ्क्षयावहा।**

**सर्पवत्प्रसर्पन्ती योषितामनिष्टदा।।२६।।**

**हन्ति मण्डला पुरं छत्रवत् पुरोहितम्।**

**वंशगुल्मवत् स्थिता राष्ट्रदोषकारिणी।।२७।।**

**व्यालसूकरोपमा विस्फुलिङ्गमालिनी।**

**खण्डशोऽथवा यता सस्वना च पापदा।।२८।।**

या प्रतीपगा यत आगता तत्रैव गता सा श्रेष्ठिनो हन्ति। तिर्यगा तिर्यक्कृत्वा या गता सा नृपाङ्गनां नृपस्त्रियं हन्ति। अधोमुखी अवाग्वदना नृपान् राज्ञो हन्ति। अथानन्तरमूर्ध्वगा ऊर्ध्वगामिनी ब्राह्मणान् द्विजान् हन्ति।

या चोल्का बर्हिपुच्छरूपिणी मयूरपुच्छाकारा सा लोकसंक्षयावाहा, लोकानां जनानां संक्षयं विनाशमावहति करोति। या च सर्पवत् प्रसर्पन्ती उरगवद् गच्छन्ती सा योषितां स्त्रीणामनिष्टदा अशुभप्रदा।

या च पतिता मण्डलाकारा भवति सा पुरं नगरं हन्ति नाशयति। या च छत्रवच्छत्राकारा दृश्यते सा पुरोहितमाचार्यं हन्ति। या च वंशगुल्मवत् स्थिता वंशगुल्माकारा सा राष्ट्रस्य दोषकारिणी भवति।

व्यालः सर्पः। सूकरो वराहः। तदुपमा तत्सदृशी। तथा विस्फुलिङ्गानामग्निकणानां माला विद्यते यस्याः। अग्निकणैर्व्याप्तेत्यर्थः। अथवा खण्डशो गता बहुविधं विशीर्णा सस्वना सशब्दा या च सा पापदा अशुभफलदा भवति।।

अन्यदप्याह-

**सुरपतिचापप्रतिमा राज्यं नभसि विलीना जलदान् हन्ति।**

**पवनविलोमा कुटिलं याता न भवति शस्ता विनिवृत्ता वा।।२९।।**

या चोल्का सुरपतिचापप्रतिमा इन्द्रधनुसदृशी सा राज्यं निहन्ति नाशयति। या च नभस्याकाशे विलीनां उत्पन्ना सती तत्रैवादर्शनं गता सा जलदान् मेघान् हन्ति। या च पवनविलोमा सम्मुखवाता कुटिलं याता वक्रं कृत्वा गता सा शस्ता न भवति। विनिवृत्ता वा उत्पन्ना सत्यधो न गता सा न शस्तेति न प्रशस्ता भवति।।

अत्रापि विशेषमाह-

**अभिभवति यतः पुरं बल वा भवति भयं तत एव पार्थिवस्य।**

**निपतसि च यया दिशा प्रदीप्ता जयति रिपूनचिरात्तया प्रयातः।।३०।।**

यतो यस्यां दिशि पुरं बलं वा अभिभवति तत एव तस्यामेव दिशि पार्थिवस्य राज्ञो भयं भीतिर्भवति। यया च दिशा प्रदीप्ता समुज्ज्वलिता निपतति तया प्रयातो गतो राजा अचिराच्छोघ्रमेव रिपूनरीन् जयति। तथा च काश्यपः- **बृ.सं.,पृ-४३४**

## ६. परिवेषलक्षणाध्यायः

तत्रादावेव स्वरूपप्रदर्शनार्थमाह-

**सम्मूर्च्छिता रवीन्द्वोः किरणाः पवनेन मण्डलीभूताः।**

**नानावर्णाकृतयस्तन्वभ्रे व्योम्नि परिवेषाः।।१।।**

रवीन्द्वोरर्कचन्द्रयोः किरणा रश्मयः पवनेन वायुना मण्डलीभूता वृत्ताकारोः कृतास्ते च तन्वभ्रे स्वल्पमेधे व्योम्नि आकाशे सम्मूर्च्छिताः प्रतिफलिता नानावर्णाकृतयो दृश्यन्ते नानाप्रकारो विचित्रो वर्ण आकृतिः संस्थानं येषां ते परिवेषा इत्युच्यन्ते।।

अथ तेषां संज्ञान्तराण्याह-

**ते रक्तनीलपाण्डूरकापोताभ्राभशबलहरितशुक्लाः।**

**इन्द्रयमवरुणनिर्ऋतिश्वसनेशपितामहाम्बुकृताः।।२।।**

ते परिवेषा रक्तादिवर्णा यथासंख्यमिन्द्रादिकृता भवन्ति। तद्यथा-रक्तवर्णः परिवेष इन्द्रकृतः। नीलवर्णो यमकृतः। पाण्डुर ईषच्छुक्लो वरुणकृतः। कापोतः कपोतवर्णो निर्ऋतिकृतः। अभ्राभो मेघाभः कृष्णवर्णः श्वसनकृतो वायुनोत्पादित इत्यर्थः। शबलः कृष्णश्वेतशारवर्ण ईशकृतः शम्भुकृतः। हरितो नीलपीतः पितामहकृतो ब्रह्मकृतः। शुक्लः श्वेतवर्णोऽम्बुकृतः सोऽपि वरुणकृत एव।।

अन्यदप्याह-

**धनदः करोति मेचकमन्योन्यगुणाश्रयेण चाप्यन्ये।**

**प्रविलीयते मुहुर्मुहुरल्पफलः सोऽपि वायुकृतः।।३।।**

धनदो वैश्रवणो मेचकं मयूरकण्ठसदृशवर्णं परिवेषं करोति। अन्य इन्द्रादयोऽन्योन्यगुणा-श्रयेण रक्ताद्या ये गुणो उक्तास्तेषां गुणानामन्योन्यं परस्परं समाश्रयेण कुर्वन्ति। अतोऽपिबहुर्णता दृश्यते। यः पुनर्मुहुर्मुहुः प्रतिक्षणं प्रविलीयते नश्यति सोऽपि परिवेषो वायुकृतोऽनिलोत्पादितोऽल्प-फलदश्च भवति। तथा च काश्यपः- **बृ.सं.,पृ-४३६**

अथ वस्तुवेशने शुभफलमाह-

**चाषशिखिरजततैलक्षीरजलाभः स्वकालसमभूतः।**

**अविकलवृत्तः स्निग्धः परिवेषः शिवसुभिक्षकरः।।४।।**

चाषः पक्षी। शिखी मयूरः। रजतं रूप्यम्। तैलं तिलतैलम्। क्षीरं गोक्षीरम्। जलं पानीयम्। एषां सदृशी आभा कान्तिर्यस्य सः। स्वकालसम्भूतः स्वकाले शिशिरादि ॠतुषट्सु सम्भूत उत्पन्नः। क्रमेण तुल्यवर्णः। एतदुक्तं भवति- चाषवर्णो नीलाभः शिशिरर्तौ क्षीरवर्णः शरदि। जलाभो हेमन्त इति। एवं स्वकालसम्भूतः। तथा अविकलवृत्तोऽखण्डः परिवर्तुलः। स्निग्धो निर्मलः। एवंविधः परिवेषः शिवसुभिक्षकरः। शिवं श्रेयः सुभिक्षं च करोति। तथा च काश्यपः- **बृ.सं.,पृ-४३६**

अन्यदप्याह-

**सकलगगनानुचारी नैकाभः क्षतजसन्निभो रूक्षः।**
**असकलशकटशरासनश्रृङ्गाटकवत् स्थितः पापः।।५।।**

सकलं समग्रं गगनमाकाशमनुचरति गच्छति सकलगगनानुचारी। उदयात्प्रभृत्यस्तं यावत्तिष्ठतीत्यर्थः। नैकाभो विविधकान्तिः। क्षतजसन्निभो रक्तवर्णः। रूक्षो निःस्नेहः। असकलः खण्डः। शकटं प्रसिद्धम्। शरासनं चापम्। श्रृङ्गाटकं त्र्यस्त्रम्। तद्वत्स्थितस्तदाकारः। पापोऽनिष्टफलदः।।

अन्यदप्याह-

**शिखिगलसमेऽतिवर्षं बहुवर्णे नृपवधो भयं धूम्रे।**
**हरिचापनिभे युद्धान्यशोककुसुमप्रभे चापि।।६।।**

**वर्णैनैकेन यदा बहुलः स्निग्धः क्षुराभ्रकाकीर्णः।**
**सर्वर्तौ सद्यो वर्षं करोति पीतश्च दीप्तार्कः।।७।।**

**दीप्तमृगविहङ्गरुतः कलुषः सन्ध्यात्रयोत्थितोऽतिमहान्।**
**भयकृत् तडिदुल्काद्यैर्हतो नृपं हन्ति शस्त्रेण।।८।।**

**प्रतिदिनमर्कहिमांश्वोरहर्निशं रक्तयोर्नरेन्द्रवधः।**
**परिविष्टयोरभीक्ष्णं लग्नास्तमयस्थयोस्तद्वत्।।९।।**

अर्क आदित्यः। हिमांशुश्चन्द्रः। तयोरर्कहिमांश्वोः प्रतिदिनमहर्निशमहोरात्रं रक्तयोर्लोहित-वर्णयोः सूर्यो लोहितवर्णोऽहनि चन्द्रो निशि यदि दृश्यते तदा नरेन्द्रवधो राज्ञो मरणं भवति।

परिविष्टयोरभीक्ष्णं तथा लग्नास्तमयस्थयोः। लग्नग्रहणोदयकाल उच्यते। अर्कचन्द्रयोरुदया-स्तमयस्थयोरभीक्ष्णं पुनः पुनः परिविष्टयोस्तद्वत्तेन प्रकारेण नरेन्द्रवध इत्यर्थः।

तथा च गर्गः- **बृ.सं.,पृ-४३८**

अत्र केचिल्लग्नास्तनभः स्थयोरिति पठन्ति। नभः शब्देन मध्याह्नकाल उच्यते। उदय-मध्याह्नास्तमयेषु यदि दृश्यते तदा नरेन्द्रवधः। तथा च समाससंहितायाम्- **बृ.सं.,पृ-४३८**

अन्यदप्याह-

**सेनापतेर्भयकरो द्विमण्डलो नातिशस्त्रकोपकरः।**

**त्रिप्रभृति शस्त्रकोपं युवराजभयं नगररोधम्।।१०।।**

द्वे मण्डले यस्यासौ द्विमण्डलः परिवेषः सेनापतेश्चमूनाथस्य भयं भीतिं करोति। नीतशस्त्रकोपकरः अतिशस्त्रकोपं च न करोतिः, ईषत्करोतीत्यर्थः। त्रिप्रभृति शस्त्रकोपमिति, त्रिप्रभृतीनि मण्डलानि त्रीणि चत्वारि पञ्चाधा शस्त्रकोपम्। युवाजोऽर्धभोगी राजा। युवराजस्य च भयम्। नगरस्य रोधं वेष्टनं च करोति। तथा च गर्गः- **बृ.सं.,पृ-४३९**

अन्याद्विशेषमाह-

**वृष्टिस्त्र्यहेण मासेन विग्रहो वा ग्रहेन्दुभनिरोधे।**

**होराजन्माधिपयोर्जन्मर्क्षे वांडशुभो राज्ञः।।११।।**

ग्रहेनदुभनिरोधे। ग्रहा भौमादयः। इन्दुश्चन्द्रः। भानि नक्षत्राणि। एषां निरोधे परिवेष्टने। एतदुक्तं भवति। चन्द्रपरिवेषमध्यगते ग्रहनक्षत्रे यदा भवतस्तदा त्र्यहेण दिनत्रयेण वृष्टिर्भवति। मासेन त्रिंशदयहोरात्रेण वा विग्रहः कलहो भवति। तथा च गर्गः- **बृ.सं.,पृ-४३९**

होराजन्माधिपयोरिति। राज्ञो नृपस्य होराजन्माधिपयोः, होराधिपो जन्मलग्नपः, जन्माधिपो राश्यधिपः, तयोस्तथा जन्मर्क्षे च जन्मक्षत्रे निरुद्धे सति राज्ञो नृपस्याशुभः।

ग्रहाणां परिवेषगतानां फलमाह-

**परिवेषमण्डलगतो रवितनयः क्षुद्रधान्यनाशकरः।**

**जनयति च वातवृष्टिं स्थवारकृषिकृन्निहन्ता च।।१२।।**

**भौमे कुमारबलपतिसैन्यानां विद्रवोऽग्निशस्त्रभयम्।**

**जीवे परिवेषगते पुरोहितामात्यनृपपीडा।।१३।।**

**मन्त्रिस्थावरलेख्कपरिवृद्धिश्चन्द्रजे सुवृष्टिश्च।**

**शुक्रे यायिक्षत्रियराज्ञीपीडा प्रियं चान्नम्।।१४।।**

**क्षुदनलमृत्युनराधिपशस्त्रेभ्यो जायते भयं केतौ।**

**परिविष्टे गर्भभयं राहौ व्याधिर्नृपभयं च।।१५।।**

केतौ परिवेषमध्यगते क्षुद् दुर्भिक्षम्। अनलोऽग्निः। मृत्युर्मरणम्। नराधियो राजा। शस्त्रमायुधम्। एभ्यो भयं भीतिर्जायते उत्पद्यते। राहौ परिविष्टे परिवेषमध्यगते गर्भाणां भयम्। व्याधिः नृपभयं नृपस्य राज्ञो भयं च भवति। तथा च समाससंहितायाम्- **बृ.सं.,पृ-४४०**

अथ द्वयादिषु ग्रहेषु परिवेषमध्यगतेषु फलमाह-

**युद्धानि विजानीयात् परिवेषाभ्यन्तरे द्वयोर्ग्रहयोः।**

**दिवसकृतः शशिनो वा क्षुदवृष्टिभयं त्रिषु प्रोक्तम्।।१६।।**

**याति चतुर्षु नरेन्द्रः सामात्यपुरोहितो वशं मृत्योः।**

**प्रलयमिव विद्धि जगतः पञ्चादिषु मण्डलस्थेषु।।१७।।**

दिवसकृतं आदित्यस्य शशिनश्चन्द्रस्य वा द्वयोस्ताराग्रहयोः परिवेषाभ्यन्तरे स्थितयोर्युद्धानि संग्रामान् विजानीयाद् विन्द्यात्। त्रिषु ग्रहेषु परिवेषमध्यगतेषु क्षुद् दुर्भिक्षभयम्। अवृष्टिभयं च प्रोक्तं कथितम्।

यातीति। चतुर्षु ताराग्रहेषु परिवेषमण्डलमध्यगतेषु नरेन्द्रो राजा सामात्यपुरोहितः अमात्या मन्त्रिणः पुरोहित आचार्यस्तैः सहितो मृत्यर्वशं याति। म्रियत इत्यर्थः। पञ्चादिषु पञ्चसु षट्सु वा मण्डलस्थेषु परिवेषमध्यवर्तिषु जगतो विश्वस्य प्रलयं संहारमिव विद्धि जानीहि।।

अधुना ताराग्रहाणां नक्षत्राणां वा पृथक्परिविष्टानां फलमाह-

**ताराग्रहस्य कुर्यात् पृथगेव समुत्थितो नरेन्द्रवधम्।**

**नक्षत्राणामथवा यदि केतोर्नोदयो भवति।।१८।।**

पृथक्ताराग्रहस्य भौमादेः। नक्षत्राणामश्विन्यादीनां वा परिवेषः समुत्थित उत्पन्नो नरेन्द्रस्य राज्ञो वधं मरणं कुर्यात्। अथवा विकल्पे। यदि केतोरुदयो न भवति तदैवम्। केतूदये तु पुरस्तत्फलमेव न ताराग्रहदिपरिवेषकृतम्। तथा च काश्यपः- **बृ.सं.,पृ-४४१**

अधुना तिथिक्रमेण परिवेषफलान्याह-

**विप्रक्षत्रियविट्शूद्रहा भवेत् प्रतिपदादिषु क्रमशः।**

**श्रेणीपुरकोशानां पञ्चम्यादिष्वशुभकारी।।१९।।**

**युवराजस्याष्टम्यां परतस्त्रिषु पार्थिवस्य दोषकरः।**

**पुररोधो द्वादश्यां सैन्यक्षोभस्त्रयोदश्याम्।।२०।।**

**नरपतिपत्नीपीडां परिवेषोऽभ्युत्थितश्चतुर्दश्याम्।**

**कुर्यात्तु पञ्चदश्यां पीडां मनुजाधिपस्यैव।।२१।।**

चतुर्दश्यामभ्युत्थित उत्पन्नः परिवेषो नरपते राज्ञः पत्न्याः पीडां करोति। पञ्चदशयां मनुजाधि-परस्य राज्ञः पीडां करोति।।

अधुना परिवेषरेखावशेन शुभाशुभफलमाह-

**नागरकाणामभ्यन्तरस्थिता यायिनां च बाह्यस्था।**

**परिवेषमध्यरेखा विज्ञेयाक्रन्दसाराणाम्।।२२।।**

**रक्तः श्यामो रूक्षश्च भवति येषां पराजयस्तेषाम्।**

**स्निग्धः श्वेतो द्युतिमान् येषां भागो जयस्तेषाम्।।२३।।**

## ७. इन्द्रायुधलक्षणाध्यायः

तत्रादावेव तत्सम्भवप्रदर्शनार्थमाह-

**सूर्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः साभ्रे।**

**वियति धनुः संस्थाना ये दृश्यास्ते तदिन्द्रधनु ः।।१।।**

सूर्यस्यादित्यस्य करा रश्मयः। साभ्रे समेघे वियत्याकाशे। पवनेन वायुना विघट्टिता द्वद्धास्ते च धनुः संस्थानाश्चापाकारा विविधवर्णा नानारूपा ये दृश्यन्ते तदिन्द्रधनुरि लोके दृश्यते।।

अत्रैव परमतं शुभाशुभं च फलमाह-

**केचिदनन्तकुलोरगनिः श्वासोद्भूतमाहुराचार्याः।**

**तद्यायिनां नृपाणमिभमुखमजयावहं भवति।।२।।**

केचिदाचार्याः काश्यपादयोऽनन्तकुले अनन्तस्य नागराजस्य कुले वंशे ये जाता उरगाः सर्पास्तेषां निःश्वास उच्छ्वसनं तदुद्भूतं तदुत्पन्नमाहुरुक्तवन्तः। काश्यपः- **बृ.सं.,पृ-४४४**

अन्यदप्याह-

**अच्छिन्नमवनिगाढं द्युतिमत् स्निग्ध घनं विविधवर्णम्।**

**द्विरुदितमनुलोमं च प्रशस्तमम्भः प्रयच्छति च।।३।।**

यद्येवं तदा द्वितीयं व्याख्यानमशोभनं पूर्वमेव ज्यायः। पश्चात् स्थितमनु-लोममिति।।

अन्यदप्याह-

**विदिगुद्भूतं दिक्स्वामिनाशनं व्यभ्रजं मकरकारि।**

**पाटलपीतकनीलैः शस्त्राग्निक्षुत्कृता दोषाः।।४।।**

विदिगुद्भूतं विदिक्स्थितमिन्द्रचापं दिक्स्वामिनाशनम्। तस्यां दिशि यः स्वामी स नश्यति। दिगधिपतीन् शाकुने वक्ष्यति-

एवं व्यभ्रजं मरककारि, विगताभ्रे गगने यदुत्पन्नमिन्द्रचापं तन्मरककारि मरकं करोति। पाटलो वर्णः कृष्णलोहितः। पीतकः पीतवर्णः। नीलो नीलवर्णः। एतैर्वर्णैर्यदि युक्तमिन्द्रधनुर्भवति तदा यथासङ्ख्येन शस्त्राग्निक्षुत्कृता दोषा भवन्ति। पाटलवर्णे शस्त्रकृता दोषाः। पीते अग्निकृता दोषाः। नीले क्षुत्कृता दुर्भिक्षजा इति।।

अन्यदप्याह-

**जलमध्येऽनावृष्टिर्भुवि सस्यवधस्तरौ स्थिते व्याधिः।**

**वल्मीके शस्त्रभयं निशि सचिववधाय धनुरैन्द्रम्।।५।।**

ऐन्द्रं धनुरिन्द्रचापं जलमध्ये यदा दृश्यते तदा अनावृष्टिवर्षणं भवति। भुवि भूमौ दृश्यते तदा सस्यानां वधो नाशो भवति। तरौ वृक्षे स्थिते इन्द्रचापे व्याधिः पीडा भवति। वाल्मीके वल्मीककृते मृत्स्तूपे शस्त्रभयं भवति। निशि रात्राविन्द्रधनुः सचिवस्य मन्त्रिणो वधाय मरणाय भवति।।५।।

अथ दिग्वशेन फलमाह-

**वृष्टिकरोत्यवृष्टयां वृष्टि वृष्टयां निवारयत्यैन्द्रयाम्।**

**पश्चात्सदैव वृष्टिं कुलिशभृतश्चापमाचष्टे।।६।।**

कुलिशभृत इन्द्रस्य चापमैन्द्रयां पूर्वस्यां दिशि दृष्टमवृष्टयामनावृष्टयां वृष्टिं वर्षणं करोति, तत्रैव दृष्टे वृष्टयां वृष्टिं निवारयति। पश्चात् पश्चिमायां दिशि दृष्टं सदैव सर्व-कालं वृष्टिं वर्षणमाचष्टे कथयति।।

अन्यदप्याह-

**चापं मधोनः कुरुते निशायामाखण्डलायां दिशि भूपपीडाम्।**

**याम्यापरोदक्प्रभवं निहन्यात्सेनापतिं नायकमन्त्रिणौ च।।७।।**

मघोन इन्द्रस्य चापं धनुः। आखण्डलायामैन्द्रयां पूर्वस्यां दिशि निशायां रात्रौ दृष्टं भूपस्य राज्ञः पीडां रोगभयं करोति। याम्यापरोदक्प्रभवतं यथासङ्ख्यं सेनापतिं नायकमन्त्रिणौ च निहन्यात्। याम्यायां दक्षिणस्यां सेनापतिम्। अपरस्यां पश्चिमायां नायकान् प्रधानपुरुषान्। उत्तरस्यां मन्त्रिणं सचिवं हन्यात्। तथा च काश्यपः। **बृ.सं.,पृ-४४७**

अन्यदप्याह-

**निशि सुरचापं सितवर्णाद्यं जनयति पीडां द्विजपूर्वाणाम्।**

**भवति च यस्यां दिशि तद्देश्यं नरपतिमुख्यं न चिराद्धन्यात्।।८।।**

निशि रात्रौ सुरचापमिन्द्रधनुः सितवर्णाद्यं सितरक्तपीतकृष्णं द्विजपूर्वाणां ब्राह्मण-प्रथमानां वर्णानां पीडां जनयत्युत्पादयति। तद्यथा- श्वेतवर्णो ब्राह्मणान् पीड्यति। रक्तः क्षत्रियान् पीतो वैश्यान्। कृष्णः शुद्रानिति। भवति च यस्यां दिशीति। यस्यां च दिशि आशायां भवति दृश्यते तद्देश्यं तद्देशभवं नरपतिमुखं नृपप्रधानं निचराच्छीघ्रं हन्यान्नाशयेत्। तस्यां दिशि यः प्रधाननृपस्तं विनाशयतीत्यर्थः।।

## ८. गन्धर्वनगरलक्षणाध्यायः

तत्रादावेव दिग्वशेन तस्य फलप्रदर्शनार्थमाह-

**उदगादिपुरोहितनृपबलपतियुवराजदोषदं खपुरम्।**

**सितरक्तपीतकृष्णं विप्रादीनामभावाय।।१।।**

खपुरं गन्धर्वनगरमुदगादिस्थितमुत्तराद्यासु दिक्षु दृष्टं यथाक्रमेण पुरोहितनृपबलपति-युवराजदोषदं भवति। उत्तरस्यां दिशि दृष्टं पुरोहित आचार्यस्तस्य दोषदमशुभप्रदम्। पूर्वस्यां नृपस्य राज्ञः। दक्षिणस्यां बलपतेश्चमूनाथस्य। पश्चिमायां युवराजस्य। तथा सितरक्तपीतकृष्णं यथासङ्ख्यं विप्रादीनां ब्राह्मणादीनाम-भावाय नाशाय भवति। सितं श्वेतवर्णं ब्राह्मणानाम्। रक्तं क्षत्रियाणाम्। पीतं वैश्यानाम्। कृष्णं शूद्राणामिति।।

अन्यदप्याह-

**नागरनृपतिजयावहमुदग्विदिक्स्थं विवर्णनाशाय।**

**शान्ताशायां दृष्टं सतोरणं नृपतिविजयाया।।२।।**

उदगुत्तरस्यां दिशि दृष्टं खपुरं गन्धर्वनगरं नागराणां राज्ञां विजयावहं जयप्रदम्। विदिक्स्थं विदिक्षु स्थितिं विवर्णानां सङ्कराणां विनाशाय भवति। शान्ताशायाम्। तत्कालं या शान्ता दिक् तस्यां दृष्टं सतोरणं तोरणसहितं नृपते राज्ञो विजयाय भवति।।

अन्यदप्याह-

**सर्वदिगुत्थं सततोत्थितं च भयदं नरेन्द्रराष्ट्राणाम्।**

**चौराष्टविकान् हन्याद् धूमानलशक्रचापाभम्।।३।।**

सर्वदिगुत्थं सर्वासु दिक्षु स्थितं सततोत्थितं च सर्वकालं समुत्पन्नं प्रत्यहं दृश्यते। तन्नरेन्द्रस्य राज्ञो राष्ट्रस्य जनपदस्य च भयं भीतिं ददाति। धूमानलशक्रचापाभं धूमस्यानलस्याग्नेः शक्रचापस्येन्द्र-धनुषः सदृशी आभा कान्तिर्यस्य तथाभूतम्। चौरास्तस्कराः। आटविका अटव्यां च ये वसन्ति। तान् हन्यान्नाशयेत्।।

अन्यदप्याह-

**गन्धर्वनगरमुत्थितमापाण्डुरमशनिपातवातकरम्।**

**दीप्ते नरेन्द्रमृत्युर्वामेऽरिभयं जयः सव्ये।।४।।**

गन्धर्वनगरं खपुरमुत्थितमुत्पन्नमापाण्डुरं पाण्डुरवर्णमशनिपातवातं करोति। दीप्तं दीप्तदिक्स्थे तस्मिन्नरेन्द्रस्य राज्ञो मृत्युर्मरणं भवति। दीप्तासु दिक्षु लक्षणं वक्ष्यत्याचार्यः शाकुने। तथा च-

वामेऽरिभयम। सैन्यस्य पुरस्य वा वामे भागे दृष्टमरिभयं शत्रुभयं करोति। सव्ये दक्षिणे जयप्रदं भवति।।

अन्यदप्याह-

**अनेकवर्णाकृति खे प्रकाशते पुरं पताकाध्वजतोरणान्वितम्।**

**यदा यदा नागमनुष्यवाजिनां पिबत्यसृग्भूरि रणे वसुन्धरा।।५।।**

यदा यस्मिनं काले खे आकाशे पुरं गन्धर्वनगरम्। अनेकवर्णाकृति बहुवर्णाचित्रसंस्थानं प्रकाशते दृश्यते। तच्च पताकाध्वजतोरणान्वितम्। पताकाभिर्वैजयन्तीभिर्ध्वजैश्चिह्नैर्बहुपट-प्रकाशते- विरचितैः, अथवा पताकाध्वजैस्तोरणैश्चान्वितं संयुक्तं तदा तस्मिन् काले। नागानां गजानाम्। मनुष्याणां पुरुषाणाम्। वाजि-नामश्वानां च रणे संग्रामे। असृग् रुधिरम् भूरि प्रभूतम्। वसुन्धरा भूः पिबति। तथा च काश्यपः- **बृ.सं.,पृ-४५१**

## ९. प्रतिसूर्यलक्षणाध्यायः

तत्रादावेव वर्णलक्षणं शुभाशुभफलं चाह-

**प्रतिसूर्यकः प्रशस्तो दिवसकृदृतुवर्णसप्रभः स्निग्धः।**

**वैदूर्यनिभः स्वच्छः शुक्लश्च क्षेमसौभिक्षः।।१।।**

प्रतिसूर्यको द्वितीयोऽर्कः स च दिवसकृत आदित्यस्य ऋतुवर्णसप्रभः आदित्यस्य ये ऋतुवर्णो उक्तास्ताम्रः कपिलो वार्कः शिशिर इत्यादिकास्तेषां सदृशवर्णः। स्निग्धो निर्मलकान्तिश्च शस्तः प्रशस्तः। तथा वैदूर्यनिभो वैदूर्यमणेः सदृशकान्तिः। नीलपीत इत्यर्थः। स्वच्छो निर्मलः। शुक्लः श्वेतवर्णश्च। क्षेमसौभिक्षः, क्षेमं सौभिक्षं च करोति।।

अन्यदप्याह-

**पीतो व्याधिं जनयत्यशोकरूपश्च शस्त्रकोपाय।**

**प्रतिसूर्याणां माला दस्युभयातङ्कनृपहन्त्री।।२।।**

पीतः पीतवर्णः प्रतिसूर्यो व्याधिं जनयत्युत्पादयति। अशोकरूपोऽशोकपुष्पसदृशवर्णो लोहित इत्यर्थः। तथारूपः शस्त्रकोपाय भवति। शस्त्रकोपं करोति। प्रतिसूर्याणां माला पङ्क्तिर्यदि दृश्यते तदा दस्युभयातङ्कनृपहन्त्री भवति, दस्यवश्चौरास्तेभ्यो भयमातङ्कमुपद्रवं नृपं च राजानं हन्ति।।

अन्यदप्याह-

**दिवसकृतः प्रतिसूर्यो जलकृदुदग्दक्षिणे स्थितोऽनिलकृत्।**

**उभयस्थः सलिलभयं नृपमुपरि निहन्त्यधो जनहा।।३।।**

भवन्त्यभीक्ष्णं दिनरात्रिसन्धौ भयं तदा भूमिपतेर्वधः स्यात्।।इति।।

## १०. रजोलक्षणाध्यायः

कथयन्ति पार्थिववधं रजसा घनतिमिरसञ्चयनिभेन।

अविभाव्यमानगिरिपुरतरवः सर्वा दिशश्छन्नाः।।१ ।।

यस्यां दिशि धूपचयः प्राक्प्रभवति नाशमेति वा यस्याम्।

आगच्छति सप्तामहात्तत्रैव भयं न सन्दहेः।।२ ।।

श्वेते राजोधनौधे पीडा स्यान्मन्त्रिजनपदानां च।

न चिरात्प्रकोपमुपयाति शस्त्रमतिसङ्कुला सिद्धिः।।३ ।।

अर्कोदये विजृम्भति यदि दिनमेकं दिनद्वयं वाऽपि।

स्थगयन्निव गगनतलं भयमत्युग्रं निवेदयति।।४ ।।

अनवरतसञ्चयवहं रजनीमेकां प्रधाननृपहन्तृ।

क्षेमाय च शेषाणां विचक्षणानां नरेन्द्राणाम्।।५ ।।

रजनीद्वयं विसर्पति तस्मिन् राष्ट्रे रजोधनं बहुलम्।

परचक्रस्यागमनं तस्मिन्नपि सन्निबोद्धव्यम्।।६ ।।

निपतति रजनीत्रितयं चतुष्कमप्यन्नरसविनाशाय।

राज्ञां सैन्यक्षोभो रजसि भवेत्। पञ्चरात्रभवे।।७ ।।

केत्वाद्युदयविमुक्तं यदा रजो भवति तीव्रभयदायि।

शिशिरादन्यत्रर्तौ फलमविकलमाहुराचार्याः।।८ ।।

# ११. निर्घातलक्षणाध्यायः

तत्रादावेव तदुत्पत्तिप्रदर्शनार्थमाह-

**पवनः पवनाभिहतो गगनादवनौ यदा समापतति।**

**भवति तदा निर्घातः स च पापो ंदीप्तविहागरुतः।।१।।**

पवनो वायुः पवनेन परेण वायुनाऽभिहतः स मारुतो गगनादाकाशादवनौ भूमौ यदा समापतति तदा तस्याभिहतस्य पतमानस्य यः शब्दः स निर्घातो भवतीत्युच्यते। तथा च गर्गः-

**बृ.सं.,पृ-४५६**

स च पापो दीप्तविहगरुतः। स च निर्घातः शब्दो दीप्तैः सूर्याभिमुखैर्दीप्तस्वरैश्च विहगैः पक्षिभी रुतः शब्दः पापो भवति। दुष्टफलद इत्यर्थः।।

अथ वेलावेशन फलमाह-

**अर्कोदयेऽधिकरणणिकनृपधानियोधाङ्गनावणिग्वेश्याः।**

**आप्रहांशेऽजाविकमुपहन्याच्छूद्रपौरांश्च।।२।।**

**आमध्याह्नाद्राजोपसेविनो ब्राह्मणांश्च पीड्यति।**

**वैश्यजलदांस्तृतीये चौरान् प्रहरे चतुर्थे तु।।३।।**

**अस्तं याते नीचान् प्रथमे यामे निहन्ति सस्यानि।**

**रात्रौ द्वितीययामे पिशाचसङ्घान् नीपीडयति।।४।।**

**तुरगकरिणस्तृतीये विनिहन्याद्यायिनश्चतुर्थे च।**

**भैरवजर्जरशब्दो याति यतस्तां दिशं हन्ति।।५।।**

अर्कोदये सूर्योदयकाले यद्यि निर्धात उत्पद्यते तदा अधिकारणिकाः। अधिकरणेन युक्तोऽधिकरणिकः। नृपो राजा। धनिन ईश्वराः। योधा युद्धकुशलाः। अङ्गनाः स्त्रियः। वणिजः क्रयविक्रय-जीविनः। वेश्या बन्धक्यः। एतान् सर्वानेवोपहन्यान्नाशयेत्। दिनारम्भाद् घटिकाद्वयं यावत् सूर्योदयः।

आप्रहरांश इति। सूेर्योदयादारभ्य प्रहरं यावदाप्रहरांशम्। दिनचतुर्थभागे तस्मिन् प्रथमे दिनचतुर्थागे। अजाश्छागाः। आविका अविप्रकाराः। शूद्राः शूद्रजातयः। पौराश्च पौरा जनाः। एतानुपहन्यात्।

आमध्याह्नादिति। प्रहरादूर्ध्वं मध्याह्नं यावत्। राजोपसेविना नृपाराधनतत्परान्। ब्राह्मणान् विप्रांश्च पीडयति उपतापयति। तृतीये प्रहरे वैश्या वैश्यजातीयास्तान्। जलदान् मेघांश्च पीडयति। चतुर्थे प्रहरे चौरांस्तस्करान् पीडयति।

अस्तं यातेऽर्के यदि निर्घात उत्पद्यते तदा नीचानधर्मकर्मकारन्निहन्ति। रात्रे, प्रथमे यामे प्रहरे सस्यानि निहन्ति नाशयति। रात्रेर्द्वितीययामे पिशाचसंघान्। पिशाचा देवयोनयः, तत्समूहान् निपीडयति।

रात्रेस्तृतीयप्रहरे तुरगानश्वान। करिणो हस्तिनो विनिहन्यात्। चतुर्थे यामे यायिनो जिगमिषुन विनिहन्यात्। यतो यस्यां दिशि भैरवो विकृतो जर्जरो भिन्नभाण्डसमुद्भूतसदृशः शब्दः स्वरो याति गच्छति तां दिशमाशां हन्ति नाशयति। तथा च समाससंहितायाम्।